Sn. No
1968

1
1968

Siva Pouran
(l'un des petits pourans)
(Incomplet).

Le commencement & la fin manquent

—

14 3036

ZZ. e. 32.

143086

दृष्टस्तदांतेसुश्रुत्वाहर्षसमन्वितः॥उवाचवचनंतत्रऋषीणांश्रृण्वतांतदा॥१॥इतिश्रीशिवपुराणेपरि
परीप्रश्नाध्यायः॥१॥सूतउवाच॥सम्यक्प्रष्टंभवद्भिस्तुयथावत्कथयाम्यहं॥कपोलकल्पितंनैतत्पूर्वं
व्यासेनभाषितं॥१॥भवद्भिःपृष्टमद्यैतद्यत्तदाचनारदेनवै॥पृष्टंपित्रेस्वयंतत्त्वज्ञानायपरमात्मनः॥२॥
कस्मिंश्चित्समयेविप्रानारदोऋषिसत्तमः॥पृथिव्याःभ्रमणंकृत्वाशिवस्थानान्यनेकशः॥३॥दृष्ट्वानत्वा
चसंपूज्यतत्वंज्ञातुंमहात्मनः॥पप्रच्छब्रह्मणेतत्रशिवरूपमनंतकं॥४॥श्रीनारदउवाच॥ब्रह्मन्ब्रह्मवि
दांश्रेष्टपितामहजगद्गुरो॥त्वत्प्रसादात्मयासर्वंविदितंमाहात्म्यमुत्तमं॥५॥भक्तिमार्गंज्ञानमार्गंतपो
मार्गंचदुस्तरं॥दानमार्गंचतीर्थानांमार्गंविश्रुतवानहं॥६॥नज्ञातंशिवतत्वंचपूजांचविधिवत्क्रमात्॥
चरितंविधिवत्तस्यनिवेदयममप्रभो॥७॥ससंदिग्धंचरित्रेहिदेवस्यपरमेष्टिनः॥प्रच्छेयंपरंमेतत्वंनि
र्गुणस्यगुणात्मनः॥८॥तस्मात्त्वयावक्तव्यंमहात्म्यंशंकरस्यच॥लोकानामुपकारार्थंव्रतानिचशिव

3-1968

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्रिवि·
२

स्यच॥९॥संतुष्टेनत्वक्वयेर्म्यः किंकिंयछतिवैफलं॥ तउत्पत्तिर्विवादंचगिरिजायाःसविस्तरं॥१०॥वक्तुम्प
स्यस्त्वंतेपूर्वंनत्वतोस्मिजगत्प्रते॥इतिश्रुत्वावचस्तस्यनरदस्यागजस्यच॥११॥उवाचवचनेतत्रब्र
ह्मलोकपितामहः॥ब्रह्मउवाच॥ब्रह्मन्नतेसाधुपृष्टोहंलोकानांहितकाम्यया॥यतश्रुत्वासर्वपापे
भ्यामुच्यतेचक्षणात्रयात्॥१२॥तत्वंनैवमयासम्यक्विष्णुनाप्रत्नविष्णुना॥शिवस्यपरमंज्ञातं
किंपुनःपामरैनरैः॥१३॥सदाब्रह्ममयंतेजोनानागतिसमन्वितं॥नस्थूलंनातिसूक्ष्मंचनचोष्मं
नातिशीतलं॥१४॥आद्यंतरहितंदिव्यंसत्यज्ञानमनंतकं॥योगिनोंतर्निधायैतत्॥ध्यायंतिनिर्म
लाशयाः१५॥तद्रूपंसकलंह्यासितज्ज्ञानविज्ञानदंमहत्॥कियताचैवकालेनतस्येच्छासमपद्यत
॥१६॥प्रकृतिनामसाप्रोक्तामूलकारणमित्युत॥आसन्नष्टौभुजायस्यानानायुधसमन्विता॥१७॥
राकाचंद्राननानानारीविचित्रवसनावृता॥नानाभरणैःसंयुक्तानानागतिसमन्विता॥१८॥नानाभ

राम·
२

रमयीदेवीप्रफुल्लपंकजाक्षिका॥अचिंत्यचेतसायुक्तासर्वयोनिसमुद्यता॥१९॥एकाकिनीयदाजाता
विकारेचाप्यनेकधा॥यतोवैप्रकृतिर्देवीततोवैपुरुषस्तदा॥२०॥उभोचमन्त्रितौतत्रविचारेतत्परौमुने
॥आवाभ्यांकिंप्रकर्तव्यंध्यायतःस्मपरस्परं॥२१॥एतस्मिन्नंतरेवाणीसमुत्पन्नागुणाश्रुता॥तपश्चैव
प्रकर्तव्यंसंशयस्यापनुत्तये॥२२ततस्ताभ्यांचतच्छ्रुत्वातपस्तप्तंसुदारुणं॥कियत्कालंतदाब्रह्मन्
ध्यानमार्गपरायणौ॥२३॥प्रकृतिपुरुषश्चैवप्रबुद्धोध्यानमार्गतः॥प्रबुद्धौविस्मयंप्राप्तौकियत्तत्सम
हातपःइति॥२४॥तदंगाज्जलधाराहिसंजाताविविधामुने॥ताभिर्व्याप्तंचसकलंब्रह्मरूपमभूत्क्षणे॥
२५॥अनंतेष्वनवत्रत्रस्यर्शेनात्तापनाशने॥तदाश्रांतश्चपुरुषतयासहजलेस्वयं॥२६॥सुष्वाप
परमप्रीतौवहुकालंतयासह॥नारायणेतिसंजातंतदानाममहात्मनः॥२७॥नारायणीतदाना
मप्रकृतेःसंमतंमुने॥नान्यत्किंचित्तदाह्यासीत्प्रकृतीपुरुषौविना॥२८॥तस्मिन्नंतरेब्रह्म

5
1968

शि॰वि॰
३

तत्वान्यासन्महन्मन:॥प्रकृतेश्चमहानासीत्महतश्चगुणास्त्रय:॥२९॥अहंकारस्ततोजातस्ततस्त
न्मात्रका:परा:॥पंचभूतान्यतोप्यासन्ज्ञानविज्ञानकान्यत:॥३०॥तत्वानामितिसंख्यानंमुक्तेरू
पिसत्तमा:॥जडात्मकंचतत्सर्वंप्रकृतिंपुरुषंविना॥३१॥नाम्यामेकीकृतंसर्वंचतुर्विंशतिसंज्ञकं
॥तद्बुहित्वाचसुघापजल्पेब्रह्मस्वरूपिणी॥३२॥सुप्तेनारायणेदेवेनाभौपंकजमुत्तमं॥अनंतपत्रि
कायुक्तंकर्णिकारसमन्वितं॥३३॥अनंतयोजनायाममनंतोछ्रायसंयुतं॥कोटिसूर्यप्रतीकाशंसु
दृशंतत्वसंयुतं॥३४॥तस्मात्पद्मात्ततोयज्ञोपुत्रोहंहेमगर्भक:॥तन्मायामोहितश्चाहंनाविदंकम
लंविना॥३५॥कोहंवाकुतआयात:किंकार्यंचमदीयकं॥कस्यपुत्रोहमुत्पन्न:केनैवनिर्मितोप्यहं
॥३६॥इतिसंशयमापन्नोविधिर्मोसमपद्यत॥किमर्थंमोहमायामियत्रैवैकमलस्थलं॥३७॥मत्क
र्त्रीवतवेत्तत्रइतिचेतस्यचिंतयं॥इतिबुद्धिंसमासाद्यकमलादवरोहयन्॥३८॥नालेनालेगत

राम॰
३

स्तत्रवर्षाणांशतकंमुने॥नलब्धंतुमयातत्रकमलस्थानमुत्तमं॥३९॥संशयंतुपुन:प्राप्त:कमलंगंतुमुद्यत:
॥आरुरोहाथकमलंनालमार्गेणवैमुने॥४०॥नालमार्गेतुव्रजत:गतंवर्षशतंपुन:॥क्षणमात्रंततस्तत्रति
ष्ठतिष्ठेतिवैश्रुतं॥४१॥परावाणीसमुत्पन्नातपेतिपरमाद्भुता॥तच्छ्रुत्वातुततस्तप्तंदादशाद्वंमयतप:तत:॥
४२॥तदाहिभगवान्विष्णुश्चतुर्बाहु:सुलोचन:॥ममैवानुग्रहंकर्तुंपीतांबरधर:प्रभु:॥४३॥शंखचक्रायुध
स्तत्रगदापद्मधर:पर:॥घनश्यामलसर्वांग:॥प्रसन्नमुखपंकज:॥४४॥मुकुटादिभूषणैर्युक्त:कोटिकंदर्प
संमत:॥प्रकृत्यानिर्मितसोथमयादृष्ट:पुरामुने॥४५॥तंदृष्ट्वासुंदरंरूपंविस्मयंपरमंगत:॥कालात्माकोच
नाम्नश्चस्वरूपमस्यनिर्गुण:॥४६॥नारायणोमहाबाहु:वासितमासदसन्मय:॥तथाभूतमयंदृष्ट्वाहर्षितो
ह्यभवंतदा॥४७॥माययामोहितस्तस्यतमवोचममर्षित:॥कस्त्वंवदेतिहस्तेनसमुत्थाप्यसनातनं॥४८
॥मयाप्रशोहिभगवान्मायामोहितचेतसा॥इत्येतद्वचनंश्रुत्वानामतोभगवान्हरि:॥४९॥उवाचत

7/1968

शि.वि.
४

वनिर्मातासत्वेनसमलंकृतः॥ वक्तुं जानिहि भद्रं ते सत्यमेतद्वदामि ते॥५०॥ तस्य तद्वचनं श्रुत्वा स्मितपूर्वं म
हामुने॥ मायया मोहितस्तस्य तमवोचं जगत्प्रभुं॥५१॥ नाथ सेवस्व स्वेति सगर्वं तुच्छया गिरा॥ मामहात्वं
स्मितं कृत्वा गुरुः शिष्यमिवानघे॥५२॥ इति प्रोक्तो मया देवः साक्षाच्च प्रकृतेः प्रभुः॥ अब्रवीन्मामजाद्यात्म
ज्ञर्पंडितः॥५३॥ कर्त्तारं जगतां साक्षात्प्रकृतेश्च प्रवर्त्तकं॥ सनातनमजं विष्णुं विरंचे विश्वसंभवं॥५४॥
विश्वात्मानं विधातारं धातारं पंकजेक्षणं॥ किमर्थं कथ्यसे ब्रह्मन्नैष्ठिकं पालयव्रते॥५५॥ त्वं च ध्याताहि
जगतामवतीर्णोऽमदंगतः॥ विस्मितोसि जगन्नाथं नारायणमनामयं॥५६॥ पुरुषं परमात्मानमात्मानं ज
गतां गुरुं॥ विष्णुमच्युतमीशानं विश्वस्य प्रभवोद्भवं॥५७॥ तवापराधो नास्त्यत्र मम मायाकृतं त्विदं॥ शृणु राम.
सत्यं परं ब्रह्मन्सर्वतन्त्रमसंभवं॥५८॥ मयासृष्टं पुरो व्यक्तं चतुर्विंशतितत्त्वकं॥ इति श्रुत्वा वचस्तस्य ४
ब्रह्माक्रोधान्वितस्तदा॥५९॥ कोवात्वमिति संत्रस्य कश्चित्कर्त्ता न वेत्तव॥ मायया मोहितश्चाहं युधं च

क्रे सुदारुणे॥६०॥ विवादशमनार्थं च बोधार्थं मुनयोरपि॥ ज्वालामाला सहस्राढ्यं कालानलचयोपमं॥६१॥ क्षयवृद्धिविनि
र्मुक्तमादिमध्यांतवर्जितं॥ अनौपम्यमनिर्देश्यमव्यक्तं विश्वसंभवं॥६२॥ यस्य ज्वालासहस्रेण मोहितो भगवान्हरिः॥ 9/1968
एवंविधं तयालिंगं प्रीतोहं मुनिसत्तमः॥६३॥ मामाह भगवांस्तत्र किमर्थं स्पर्द्धसे धुना॥ आगतं किंचिदद्यैवेति तिष्ठतां युव
मावयोः॥६४॥ कृतएवास्य संभूतिः परीक्षा क्रियतामज॥ वायुवेगसमो भूत्वा गच्छोर्द्ध्वं विश्वनाथ नेव॥६५॥ भवान्हंस्य
प्रयत्नेन एतदंतं गवेषय॥ हंसरूपं त्वया धार्यं वराहं च मया पुनः॥६६॥ एवं व्याहृत्य भगवान्स्वरूपमकरोत्तदा॥ हंस
श्चाहं तदा जातो विचित्रः पक्षसंयुतः॥६७॥ तदाप्रभृति माऽहंसोहंसो विराडिति॥ हंसो हंसेति यो ब्रूयात्तस्य मुक्तिर्भ
ऊर्ज्जन॥६८॥ सुश्वेतस्त्वनिलपक्षो विश्वतः पक्षसंयुतः॥ मनोनिलजवो भूत्वा तत्रोर्द्ध्वं गतो ह्यहं॥६९॥ नारायणोपि वि
श्वात्मा सुश्वेतो ह्यभवत्तदा॥ दशयोजनविस्तीर्णं आयातं शतयोजनं॥७०॥ मेरुपर्वतवर्ष्माणं तीक्ष्णदंष्ट्राग्रदंष्ट्रिकं॥
कालादित्यसमाभासं च दीर्घघोणं महास्वरं॥ ऋग्वेदादिचतुःपादं विचित्राङ्गजराजितं॥७१॥ वाराहं रूपमास्थाय गतवान्

शि॰वि॰ ५

तदधोजवान्॥एवंवर्षसहस्रंतुचरन्विष्णुरधोगतः॥७२॥तदाप्रभृतिलोकेषुश्वेतवाराहकल्पकः॥७३॥इतिश्रीशि
वपुराणेद्वितीयोध्यायः॥२॥ ॥सूतउवाच॥तदानंतरंचयज्ञोतेप्रक्ष्यतांऋषिसत्तमाः॥ब्रह्मातंचबुध्वाकालं॥विष्णु
नाप्रभविष्णुना॥१॥नापश्यदस्यमध्यस्थमूलंलिंगस्यमूकरः॥तावत्कालंगतोत्युर्ध्वमहमप्यरिसूदन॥२॥सत्वरं
सर्वयत्नेनतस्यांतंज्ञातुमिछयाश्रांतोनदृष्टतस्यांतंमहत्कालादधोगतः॥३॥तथैवनगवान्विष्णुःश्रांतःसुत्रस्त
विलोचनः॥समागतोमम॥यासाईसस्मारकिमिदंत्विति॥४॥अनिर्देश्यंचतद्रूपंनामकर्मविवर्जितं॥अलिंगंलिं
गतांयातिध्यानमार्गप्रगोचरं॥स्वस्थचित्तंतदाकृत्वानमस्कारपरायणो॥जानीयावोनतेरूपंयोसिसोसिनमोस्तु
ते॥५॥एवमस्माद्व्राह्यतंजातंनमस्कारंप्रकुर्वतो॥तदासमभवत्तत्रनादंशब्दलक्षणं॥ॐमितिचमुनिश्रेष्ठसु राम॰ ५
स्पष्टंप्लुतलक्षणं॥किमिदंत्वितिसंचिंत्यमयातिष्टंमहास्वने॥७॥यस्माछब्दःसमुत्पन्नेसस्मेतुभ्यंनमोस्तुते
॥लिंगस्यपश्चिमेभागेतदापश्यसनातनं॥८॥मितिसूर्यमंडलसंकाशंवर्णमाद्यंतुदक्षणे॥उतरेपश्चात्

पश्चादुकारंऋषिसत्तमा॥९॥रितांचमंडलप्रख्यंमकारंतस्यमध्यतः॥तस्योपरितदापश्यतच्छुद्धस्फटिकसन्नि
भं॥१०॥ॐकारात्तितमममलंनिष्कलंनिरुपद्रवं॥निर्द्वंद्वंकेवलंतत्वंबाह्याभ्यंतरवर्जितं॥आदिमध्यांतरहितंमा
नंदस्यापिकारणं॥सत्यमानंदममृतंपरंब्रह्मपरायणं॥एकाक्षराद्कारश्चोनगवान्निललोहितः॥सर्गक
र्ताअकारश्चउकारश्चस्तपालकः॥मकारश्चस्त्ययोनित्यमनुग्रहकरोभव॥अहमेवहरिब्रह्मन्विस्मयौवि
ष्टमासः॥एतस्मिन्नंतरेन्यद्रूपमद्भुतसुंदरं॥पंचवक्त्रंदशभुजंकर्पूरगौरकंमुने॥नानाकांतिसमायुक्तंना
नाभूषणसंयुतं॥महोदरंमहावीर्यमहापुरुषलक्षणं॥तंदृष्ट्वापरमेरूनिपंमोताअयमेवहि॥इतिविज्ञाय
देवेशंयथावत्स्तुतिसम्भितैः॥मंत्रैर्महेश्वरंदेवंतुष्टुपविचमहोदयं॥आवयोस्तत्यासंतुष्टोलिंगेगास्मि
न्निरंजनः॥दिव्यंशब्दमयंरूपमास्थायप्रहसंस्थिताः॥आकारस्तस्यमूर्धन्विललाटंदीर्घउच्यतेरकारं
दक्षिणंनेत्रंमिकारंवाममलोचनं॥उकारंदक्षिणंश्रोत्रंमृकारंवामउच्यते॥पंक्तीसकारोदक्षिणस्तस्यक

11/1968

शि॰वि॰
६

पोल परमेष्ठिनः॥ वामकपोलऋकारन्तु ऌकारो नासापुटे उभे॥ एकार ऊर्द्ध्वतश्चोष्ठे ऐकारश्चाधरस्मृतः॥ ओंकार
श्चनयोऽकारो दंतपंक्तिद्वयं क्रमात्॥ अं अश्च तालु तुंडे तु देवस्य धीमतः॥ कादिपंचाक्षराण्यस्य पंचहस्ता
श्च दक्षिणाः॥ चादिपंचाक्षराण्येव पंचहस्ताश्च वामतः॥ टादिपंचाक्षरं पादो तादिपंचाक्षरं तथा॥ पकार
श्च फकारश्च देवपार्श्वे उदाहृते॥ बकारः पृष्ठदेशः स्यात् नकारो नाभिरेव च॥ मकारो हृदयं प्रोक्तं महादेव
स्य योगिनः॥ यकारादि सकारांते विज्ञेया वै सप्तधातवः॥ हकारः प्राणभूतश्च अंतरात्मा ळेच हृदये॥ परमा
त्मस्वरूपं च क्षकारः सर्वशक्तिमान्॥ एवं शब्दमयं रूपमगुणस्य गुणात्मनः॥ ते दृष्ट्वा शंकरं देवमावाभ्यां
संस्तुतं विभुं॥ प्रार्थयंतौ पुनस्तं वै रूपाकार्यायतं विभो॥ इति मे वै वचनं श्रुत्वा तत्र विष्णुर्मया सह॥ उ
वाच यद्वि देवेश प्रसन्नो भगवानिह॥ त्वदीयास्मो न वा स्तत्र यथा युक्तं करोतु वै इत्येतद्वचनं श्रुत्वा भर्गो
दुर्वाक्यमथाब्रवीत्॥ सृष्टिकर्त्ता भवेत् ब्रह्मा सृष्टेश्च पालको हरिः॥ मदीयश्च तथाप्यंशो अंत्ये तं सेह

राम॰
६

रिष्यति इयं च प्रकृतिर्देवी यानारायणमाश्रिता॥ एतस्याः संभवं प्राप्ता ब्रह्माणी सा भविष्यति अन्या शक्तिः प्र
नस्तत्र प्रकृतेः संभविष्यति समाश्रयिष्यते विष्णुं लक्ष्मीरूपेण सा तदा॥ पुनश्च कालिनाम्नी वै मदंशं प्राप
यिष्यति॥ ज्योतिरूपेण सा तत्र कार्यार्थे संभविष्यति॥ एवं देव्यस्तथा प्रोक्ताः परमास्तु भाः॥ सृष्टिकृद्विष्णुरुद्रे
षु सम्यक् संबंधितो गताः॥ प्रीताः कुर्वंति कल्याणं सर्वसौभाग्यदाः शुभाः॥ इत्येवं च वचः श्रुत्वा विष्णुर्वाक्यम
थाब्रवीत्॥ श्रीभगवानुवाच॥ भवदुक्तं करिष्यामि कार्यं सर्वमतंद्रिताः॥ किंचिद्विज्ञापनामेस्ति यदाह्मेतेव
शाम्यहं॥ ततो वचनमारब्धं शंकरेण महात्मना॥ यद्यदिष्टं तमेंतु से दास्यामि हितकाम्यया॥ विष्णुर्मयास
होवाच शंकरं लोकशंकरं॥ श्रीभगवानुवाच॥ देवदेव नमस्तुभ्यं देहि तत्त्वं नमोस्तु ते॥ ध्येयं सेव्यं तथा पू
ज्यं वक्तुमर्हसि सुव्रत॥ यत्कृत्वा सर्वसामर्थ्यं भविष्यति न संशयः॥ इत्युक्तः शंकरस्तस्मै ददौ नादात्म
कं शिवं॥ प्रणवात्मकं परं तत्त्वं लब्धवान् परमात्मनः॥ हरिः तत्र परं तत्त्वं ज्ञात्वा रूपमपश्यत॥ तद्रूपं

12
1968

शि॰वि॰
७

तेप्रवक्षामि मंत्रतत्वं श्रुणु नान्यथा॥ विदेमिहरोयथोवाचतथाते हं ब्रवीमिह॥ ॐकार प्रणवं मंत्रं कलापंचकसं
युतं॥ ॐतत्वमसित्युक्तं महावाक्यं हरस्य च॥ स्फुतास्फटिकसंकाशं मंत्ररूपमनुत्तमं॥ मेधाकरमनंत
न्मयः सर्वकामार्थसाधकं॥ पुनर्मंत्रं तथा स्वंच गायत्रीलक्षणं महत्॥ चतुर्विंशति वर्णाढ्यंच तुर्वर्गफलप्रदं
॥पुनर्मृत्युंजयं मंत्रं दक्षिणामूर्त्तिसंज्ञकं॥ पंचमंत्रान् तथा लब्ध्वा जजाप भगवान् हरिः॥ जपतस्तस्य देव
स्य प्रादुर्भूतो हरः स्वयं॥ पुनः प्रसन्नतत्रैव हरये परमात्मने॥ निगमं श्वासरूपेण ददौ तस्मै महात्मने
॥तत्र मंत्राश्च नेकैवै तत्र कर्माण्यनेकशः॥ सर्वविद्याविद्याविधिर्देवो हरश्चासीन्महामुने॥ स्नानः स
र्वविद्यानां स्फूर्तिरेषा सनातनी॥ हरोविष्णुमहाविद्यां हरिर्मध्यमरात्पुनः॥ पुरतः श्वासरूपेण प्राप्तवान्नि राम॰
गमं तदा॥ स्वीयं ज्ञानमदात्तस्मै रहस्यपरमात्मने॥ परमात्मा पुनर्महद्यं दत्तवान् तपसा ७
मुने॥ संप्राप्य निगमं पप्रच्छ पुनरेव तां॥ कथं चतुष्प्रसेदेवमयाधेयः कथं प्रभो॥ किंध्येयं

चैषप्रकर्त्तव्यं शंकरं च कथं व्रजेत्॥ एतत्सर्वं महादेव कृपां कृत्वा ममोपरि॥ कथनीयं प्रयत्नेन श्रृणवतां पापहार
कं॥ इत्येवं वचनं श्रुत्वा प्रसन्नो भगवान् हरिः॥ उवाच हरयेतत्र श्रृणुष्वावहितो हरेः॥ इदं लिंगं सदा पूज्यं ध्यानेन चै
तारकं मम॥ इदं मनीदृश्यते यत्तत्तथा कार्यं त्वया सह पूजितो लिंगरूपेण प्रसन्नो विविधं फलं॥ दास्यामि सर्वलो
केभ्यो मनोभिष्टान्यनेकशः॥ यदा दुःखं भवेत्तत्र पूजिते दुःखनाशनं॥ इति दत्वा हरस्तस्मै वरानन्यान्नेक
धा॥ उवाच वचनं देवविस्मये भन्नविष्णवे॥ अयं ब्रह्मा तथाकर्त्ता सृष्टेः कार्यं निरंतरं॥ पालयत्वं सदा देवमद्भ
क्तिं परमां कुरु॥ इत्युक्त्वा तु पुनस्तस्मै पूजाविधिमदात् प्रभुः॥ येनैव पूजितः शंभुः फलं यच्छत्यनेकशः॥ तद
हं कथयिष्यामि सर्वपापहरं परं॥ ततः सर्वमयं देवं विश्वरूपं महेश्वरं॥ अनंतं निष्कलं देवं ऋग्यजुः सा
मरूपिणं॥ सर्गस्थितिलयानां हि कर्त्तारं परमेश्वरं॥ तुष्टाव पुनरिष्टाभिर्वाग्भिर्देवं महेश्वरं॥ हरिरुवाच॥
ॐअकारात्मदेवाय उकारात्मदेवाय उकारात्मकरूपिणे॥ तृतीयाय मकाराय शिवाय परमात्मने॥ जलाय

शि॰वि॰
८

जलजस्थायनमस्तेजलव्यापिने॥चित्तयेचित्तरूपायस्मृतिरूपायतेनमः॥ज्ञानायज्ञानगम्यायनमस्ते
परमात्मने॥हिरण्यबाहवेतुभ्यंनमस्तेहेमरेतसे॥कपर्दिकेनमस्तुभ्यंनागागानरणायते॥वृषा
कपयेशर्वायकस्त्रैर्वेहर्येनमोनमः॥शिवायशिवरूपायव्यापिनेव्योमव्यापिने॥नमोनिधीनांपत
येलिंगिनेलिंगरूपिणे॥तेजसेतेजसोभर्त्रेनमस्तेशार्वरूपिणे॥शाश्वतायवरिष्ठायवारिगर्भाययो
गिने॥आत्मनेऋषयेतुभ्यंस्वामिनेविघ्नवेनमः॥ॐकारायनमस्तुभ्यंसर्वज्ञायनमोनमः॥विर
रामइतिस्तुत्वाब्रह्मणासहितोहरिः सूतउवाच॥इदंस्तोत्रंपरंपुण्यंसर्वपापप्रणाशनं॥यपठेच्छृणु
याद्वापिश्रावयेद्वाद्विजोत्तमान्॥सयातिब्रह्मसदनंपापकर्मरतोपिसन्॥कल्याणंवर्द्धतेतस्यशु
क्लपक्षेयथाशशी॥सर्वपापविशुध्यर्थंविष्णुनापरिभाषितं॥इतिशिवपुराणेतृतीयोध्यायः॥३॥
॥सूतउवाच॥अथोवाचमहादेवःप्रीतोहंसुरसत्तमः॥पश्यतांमांमहादेवंभयंसर्वंप्रमुच्यते॥

राम॰
८

युवांप्रसूतौप्रकृतेर्मदिच्छयामहाबलौ॥मयारूपंचयानित्यंनिर्गुणंसगुणीकृतं॥अयंमेदक्षिणेब्रह्मा
पार्श्वेलोकपितामहः॥वामपार्श्वेचमेविष्णुर्विश्वात्माहृदयेपरः॥प्रीतोहंहृदयेसम्यक्वरंददामियदीप्सि
तं॥एवमुक्त्वातुमांविष्णुःकराभ्यांपरमेश्वरः॥पस्पर्शकरुणापूर्वंघृणयासघृणानिधिः॥ततःप्रहृष्टम
नसाप्रणिपत्यमहेश्वरं॥प्राहनारायणोदेवोलिंगस्थंतिलिंगवर्जितं॥यदिप्रीतिःसमुत्पन्नायदिदेयो
रस्थनौ॥भक्तिर्भवतिनोनित्यंत्वयिचाव्यभिचारिणी॥महादेवोवाच॥देवप्रसन्नवदनोभूत्वोवाचमहामु
ने॥कार्यार्थंनिर्मितौदेवौनादेयंविद्यतेमम॥जनुत्यामवनींगत्वापुनर्नारायणःस्वयं॥प्रणिपत्यचविश्वेशं
प्राहमंदतरंवचः॥आवयोर्देवदेवेशविवादोभूत्पुरातन॥इहागतौसिभगवान्विवादशमनायनौ॥त
स्यतद्वचनंश्रुत्वापुनराहहरोहरिं॥प्रणिपत्यस्थितंमूर्ध्नाकृतांजलिपुटंतदा॥शिवउवाच॥मयिभक्ति
दृढाभूयात्पुवयोरप्यनुज्ञा॥यापार्थिवीचैवमन्मूर्तिर्विधायकृतांयुवां॥सेवाचविधिवत्माज्ञौकृत्वासु

17/1968

शिवि
९

खमवाप्स्यथ॥उपरिष्टादखिलान्धर्मान्कर्माणिविविधानिच॥ब्रह्मन्सृष्टिंकुरुत्वंहिमदाज्ञापरिपालक॥
वत्सवत्सहरेत्वंचपालयस्वचराचरं॥त्रिधाभिन्नोस्म्यहंविष्णोब्रह्मविष्णुहराख्यया॥सर्वरक्षाकरगुणोवि
ष्णोहंसदाहरे॥मद्रूपंपरमंब्रह्मन्नरदंशंनवरंगतः॥प्रकटीभवितालोकेनाम्नारुद्रःप्रकीर्त्तितः॥
मदंशात्तस्यसामर्थ्यंन्यूनंनैवभविष्यति॥योहंसोयंनभेदोस्तिपूजाविधिविधानतः॥पथाच्चयोति
षःसंगात्जलादेःस्पर्शतानहि॥तथाममगुणस्यापिसंयोगाद्बंधनंनहि॥शिवरूपंममैतच्चरुद्रोपिशि
ववञ्चदः॥नतत्रपरभेदोवैकर्त्तव्यश्चमहामुने॥वस्तुतोप्येकरूपंत्वंद्विधाभिन्नंजगत्सुत॥सुवर्णस्यय
थैकस्यवस्तुत्वंनैवगच्छति॥अलंकारेकृतेदेवनानाभेदोनवस्तुतः॥यथैकस्यवस्तित्वंनैवगच्छति
मृदोभेदोनानापात्रेनवस्तुतः॥यथैकस्यसमुद्रस्यविकारोनैववस्तुतः॥कारणस्यैवकार्येचनिदानेच
निदर्शनं॥एवंज्ञात्वाभवद्भ्यांतुनदृश्यंभेदकारणं॥वस्तुतःसर्वसदृशंशिवरूपंमतंमम॥अहंभवा

राम
९

न्यश्चैवरुद्रोयंयोभविष्यति॥एकंरूपंनभेदोस्तिकृतेभेदेचबंधनं॥तथापिचमदीयंवैशिवरूपंसनातनं॥
मूलभूतंसदोक्तंयत्सत्यंज्ञानंतकं॥एवंज्ञात्वासदाध्येयंतत्वजिज्ञासुनात्वया॥विशेषोत्रकथंत्वमेतच्छ्रू
यतांकथ्यतेमया॥भवंतोप्रकृतेर्जातौनायंवैप्रकृतेपुनः॥मदंशोभविताताततब्रह्मणोन्कुटस्तथा॥गु
णोप्यपियथाप्रोक्तस्तामसःप्राकृतोहरः॥वैकारिकश्चविज्ञेयोयोहंकारउदाहृतः॥नामतोवस्तुतोनै
वतामसःपरिचक्षते॥एतस्मात्कारणात्ब्रह्मन्करणीयमिदंत्वया॥समोहंसर्वलोकेषुपालयेजगदं
डकं॥एतस्याप्रकृतेर्लक्ष्मीएतदंशाभविष्यति॥महाकालीतिसाख्यातासर्वकार्यविशारदा॥त्वंविशेषमा
ससमाश्रित्यकार्यंकर्तुमिहार्हसि॥ब्रह्मन्त्वंचस्वरांदेवींकार्यंकुरुअतंद्रितः॥अहंकालींसमाश्रित्य
करिष्येकार्यमुत्तमं॥चतुर्वर्णमयंलोकंतथाश्रमचतुष्टयं॥तदन्यैर्विविधैःकार्यकृतैःसुखमवाप्स्यथ
॥ज्ञानविज्ञानसंयुक्तालोकानांहितकारकाः॥मुक्तिदोप्रभावान्देनेनवलोकेसनातनः॥मदर्शनेफ

19
1968

शि॰वि॰
१०

लेयं वै तदेव तव दर्शने॥ ममैव हृदये विष्णुर्विष्णोश्च हृदये ह्यहं॥ उभयोरंतरं वेत्ति समजय निपूर्वजान्
॥ इदं लिंगं सदा पूज्यं तव शंभोः सुखहेतवे। तस्माच्च विधेरन्यो वर्त्तनोन मतो मम॥ हे मे वा पार्थिवं वापि
लिंगं पूज्यं सदा बुधैः॥ एवमुक्त्वा स भगवान् तत्रैवांतरधीयत॥ तदा प्रभृति लोकेस्मिन् लिंगे पूजाविधि
स्मृता॥ लिंगवेदी महादेवी लिंगसाक्षी महेश्वरः॥ यस्तु लिंगसमीपे तु कार्यं किंचित्करोति च॥ तस्य फलस्य
संख्यानं न शक्नोमि महामुने॥ यस्तु लिंगसमाख्यानं पठते लिंगसंनिधौ॥ षण्मासाल्लिंगरूपी वै नात्र
कार्या विचारणा॥ इति श्रीशिवपुराणे शिवोत्पत्तिवर्णनो नाम चतुर्थोध्यायः॥४॥ ॥ऋषय ऊचुः॥ सूत सूत
महाभाग लिंगोत्पत्तिः श्रुता वह॥ श्रुत्वा यस्याः प्रभावेन दुःखनाशो भवेदिह॥ तदंते च यथा जातं माहात्म्यं राम॰
शंकरस्य च॥ सृष्टेश्चैव प्रकारं तु कथयस्व विशेषतः॥ सूत उवाच॥ सम्यक्पृष्टं महाभागा यज्जातं तदनं १०
तरं॥ कथयिष्यामि संक्षेपाद्यथा पूर्वं श्रुतं मया॥ अंतर्हिते तदा देवे शिवरूपे सनातने॥ ब्रह्मणा विष्णु

नातने॥ ब्रह्मणा विरूपं हंसवाराहयोस्तदा॥ संकृतं तस्ताभ्यां यत्कृतं श्रूयतामिति॥ ऋषय ऊचुः॥ ॥अस्मा
कं संशयस्तावत छेत्तुमर्हसि प्रभो॥ हंसवाराहयोस्त्वं ताभ्यां चैव धृतं कथं॥ अन्यद्रूपं विहायैव किमत्र
कारणं वद॥ इत्येवं वचनं श्रुत्वा सूतः पौराणिको ब्रवीत्॥ गगने हंसरूपस्य गतिर्भवति निश्चला॥ हंस
स्यैव विवेकोस्ति जलदुग्धविभागयोः॥ अज्ञानाज्ञानयोस्तत्वं तद्विवेकाय हंसकः॥ विवेको लभ्यते नैव यतो
हंसो व्यलीयत॥२००॥ सृष्टेः प्रवर्त्तिकामस्य हंसरूपं च सिद्धिदं॥ वाराहकारणं रूपं कल्पार्थं च प्रकल्पि
तं॥ यद्दिने च समारभ्य रूपं च धृतवान्हरिः॥ तद्दिनं प्रथमं कृत्वा कल्पो वाराहसंज्ञितः॥ तदिच्छा वा त
थाजाता ताभ्यां रूपं तथा धृतं॥ नैवात्र विस्मयः कार्यो हंसवाराहकारणे॥ प्रस्तुतं श्रूयतां पुत्र ब्रह्मैव विकृ
तं च यत्॥ अनेन निष्कलेर्लिंगे निर्गुणे गुणरूपिणि॥ तथैव ब्रह्मा विष्णुश्च तेपाते परमं तपः॥ कियं
ताचैव कालेन प्रादुर्भूतो हरः स्वयं॥ विष्णवे च वरान्दत्वा गुणेषु मनस्थतां व्रज॥ गुणाः सत्वादयश्चैते

तेसर्वेदिविमोहिताः॥तस्मात्त्वंसर्वलोकेषुमान्योपूज्योभविष्यति॥ब्रह्मणानिर्मितेलोकेयदादुःखंप्रजा
यते॥तदात्वंसर्वदुःखानांनाशायतत्परोभव॥५०॥विधिधानवतारांश्चगृहीत्वाकीर्तिमुत्तमां॥विस्तार
यहरेलोकेकृपालुपरमेश्वरः॥गुणरूपोह्यहंरुद्रेत्यनेनवपुषापुनः॥कार्यंकरिष्येलोकानांसर्वथानात्रसंश
यः॥ममध्येयेनवोऽश्चैवतवध्येयोप्यहंसदा॥आवयोरंतरंनैवत्वमुक्तंपुरातव॥मद्भक्तोयःपुरात्वांनि
द्यातेयःकरिष्यति॥तस्याहंसकलंपुण्यंभस्मीकृत्वाक्षणान्महत॥नरकेपातयिष्यामित्वद्वेषात्पु
रुषोत्तम॥लोकेस्मिन्मुक्तिदोभक्तानांभक्तिदश्चविशेषतः॥ध्येयःपूज्यश्चसर्वेषांनिग्रहानुग्रहंकुरु॥
इत्युक्त्वाचैवब्रह्माणोहस्तेधृत्वास्वयंहरः॥कथयामासदुःखेषुसहायोभवसर्वदा॥सर्वाध्यक्षश्चदे
वेषुभुक्तिमुक्तिप्रदायकः॥भवत्वंसर्वथाश्रेष्ठोभुक्तिमुक्तिप्रदायकः॥सर्वेषांप्राणरूपश्चभवत्वंच
ममाज्ञया॥त्वंचसमाश्रितायेवैमामेवसमुपाश्रिताः॥अंतरंयश्चजानातिनिरयेपततेध्रुवं॥इदंरू

पंत्वयापातावत्रक्षणीयंमदाज्ञया॥यावच्चब्रह्मणोप्यायुःशतवर्षमुदाहृतं॥चतुर्युगसहस्रंतुब्रह्मणो
दिनमुच्यते॥रात्रिश्चतावतीतस्यमानतःक्रमेणतु॥तावत्त्वत्श्चेवकार्यंवैकर्तव्यंविविधंगुणैः॥गुणैश्च
भवान्सृष्टेःसात्वतःपुरुषोत्तमः॥इत्येतद्वचनंसर्वंतथेत्योमितिवैहरिः॥उवाचपरमःप्रीतःशं
करःप्रियकाम्यया॥हरिरुवाच॥शंकरःश्रूयतामेतत्कृपासिंधोजगत्पते॥सर्वंचैतत्करिष्यामि
भवदाज्ञापरायणः॥मध्येयःसदात्वंहिभविष्यतुनचान्यथा॥भवतःसर्वसामर्थ्यंलब्धंचैवंपुरामया॥
क्षणमात्रमपिचतेध्यानंवैपरमात्मनः॥चित्तसोहूरतोनैवमागच्छतुकदाचन॥ममभक्तश्चयोनि
त्यंतवनिंद्यांकरिष्यति॥तस्यवैनिरयेवासोजायतेनात्रसंशयः॥त्वयोर्वैविजानातितस्यमुक्तिर्न
दुर्लभा॥महीमाचरीयोत्रवर्द्धितोभवतानघ॥कदाचिद्देवगणानांजायतेतेगुणोपरि॥तर्हितेव्यभि
तिप्रोक्तंवचनंविष्णुवक्रतः॥तुष्टुत्तावचनंदेवःक्षंतव्याःतेपराधकाः॥इत्युक्त्वातदृधेशंभुःसर्वकल्प

23
1968

शि॰वि॰ णकारकः॥अतर्हितेतदादेवेब्रह्मालोकपितामहः॥तदीयंवचनंकर्तुंसमाधानपरायणः॥नमस्कृत्यत
११ दाविष्णुंज्ञानंप्राप्यहरेस्तथा॥आनंदंपरमंगत्वासृष्टिंकर्तुंमनोदधे॥विष्णुश्चापितदातत्रब्रह्मांतर्धानं
मुपागमत्॥पूर्वंसृष्टंजलंयच्चतत्रांजलिंसमाक्षिपत्॥अतोंडकःसमभवत्तत्रचतुर्विंशतिसंज्ञके॥वि
राट्रूपंसमभवत्जडरूपंतदंडकं॥ततःसंशयमापन्नंतपस्तेपेसुदारुणंद्वादशाब्दंपुनस्तावविष्णु
ध्यानपरायणः॥तस्मिंश्चसमयेविष्णुःप्रादुर्भूतोहिनारद॥प्रसन्नोस्मिवरंब्रूहिनारदेयंविधतेत्तवा॥
ब्रह्मोवाच॥युक्तमेतन्महाराजदत्तोहंत्वांनुयाचते॥तत्कृतंयाच्यतेमेद्यजडोभूतेप्रदत्वपते॥प्रा
णभूतोभवानद्यतत्रचैतन्यमावह॥इत्युक्तेचतदातेनब्रह्मांतोशाशोरोपयणः॥अनंतरूपम राम॰
स्थायप्रविवेशतदंडकं॥सहस्रशीर्षापुरुषःसहस्राक्षः॥सहस्रपात्॥सभूमिंसर्वतःस्पृष्ट्वात १२
दंडंव्याप्नवानिति॥इतिश्रीशिवपुराणेब्रह्मांडनिर्माणंनामपंचमोध्यायः॥ ॥५॥ ॥सूतउवाच

श्रूयतांऋषयःश्रेष्ठाःकथांपापप्रनाशनीं॥प्रविष्टेविष्णुनातस्मिन्ब्रह्मणासंस्कृतेनवै॥सचे
25/1968
तनमभूत्तच्चचतुर्विंशतिसंज्ञिकं॥तोपालादिसमारभ्यसत्यलोकावधिस्वयं॥राजतेसमहरिस्त
त्रसर्वलोकेश्वरः॥ब्रह्मांडस्यचनाशोवैनास्तिनाशोत्रयस्यवै॥तत्पदंमेबुधाआऊःश्रूयतांसमता
चनारद॥ततोब्रह्माऋषीन्सप्तभृग्वादीन्निर्ममेतदा॥उत्संगान्नारदंश्रेष्ठंछायायाःकर्दमंतथा
॥अंगुष्ठाच्चतथादक्षंएवंचैवदशक्रमेणतु॥भृगुश्चैवतयाजातोमरिचिर्नामवैऋषिः॥ततश्चकश्य
पोजातोतेनेवपूरिताधरा॥षष्टिकन्यास्तथाजाताःदक्षस्येवमहात्मनः॥त्रयोदशातयाकन्याकश्य
पायमहात्मःने॥दत्ताःदक्षेणताःकन्याःविधिवत्सर्वतप्रिय॥तत्रत्यमसूतिभिर्व्याप्तंतासांचकश्यप
स्यच॥देवश्चदक्षजाश्चैवदैत्याश्चविविधास्तथा॥वृक्षाश्चपक्षिणश्चैवसर्वपर्वतवीरुधःप्रसूता
दक्षकन्याभिव्याप्तमेतच्चराचरं॥पातालेचसमारभ्यसत्यलोकावधिर्ध्रुवं॥ब्रह्मांडंसकलंव्याप्तंम्र

स्यंनेव कदाचन॥ सतीनामचिरं कालाग्रे शंभुना रक्षिता सदा॥ तापोर्थं निर्मिता पूर्वं शंभुना प्रतविष्णुना॥
तत्र गत्वा स्वयं शंभुः रुद्ररूपमहेश्वरः॥ वामांगो गेयस्य देवं कुंगेत दक्षणेणगे तथा सती॥ रुद्ररूपमिस
तिकन्या रुद्राय परमात्मने॥ दत्ता दक्षेण विधिवत ब्रह्ममालोद्भवायसा॥ ऋषयऊचुः॥ सूतसूत
महाभागकथापापप्रणाशनी॥ रुद्रोत्पत्तिमयंसाधो कथयस्वप्रसादतः॥ सूतउवाच॥ ॥श्रु
णवंतु ऋषयः श्रेष्टाः कथां दिव्यां परस्य च॥ अंतर्हिंमते महादेवे विष्णुर्वैतद्दितेतया॥ ध्यानमा
र्गमुपाश्रित्य शंभोराज्ञामवाप्य च॥ तपोलोकंसमास्थाय ब्रह्मातिष्टत्तपोधनः॥ अन्येषु सर्वलो
केषु यथायोग्यमवस्थिता॥ ततश्च मानसाः पुत्राः ब्रह्मणा निर्मिता पुरा॥ तेचोर्ध्वरेतसः सर्वे
पश्चादन्यान् ऋषीन् प्रभुः॥ तैर्विरक्ताश्च संजाताः पश्चात्क्रोधमवापत॥ तेनैव रोदनं चक्रे तत
श्चैवनवद्धरः॥ रोदनाद्रुद्रनामेति प्रसिधो भगवान् हरः॥ ब्रह्मन् किंदुःखमुत्पन्नं स्फेटय

27
1968

मितियानघ॥ इत्येतद्वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत्॥ साधु चोक्तं त्वया देव सृष्टौ विघ्नो दयो नवतन्नया
कार्यं त्वया देव सृष्टिः स्यादनपायिनी॥ इत्येतद्वचनं श्रुत्वा लोकानां दुःखहा हरः॥ वचनं त्वमुक्तवान्
तत्र सृष्टेः प्रियचिकीर्षया॥ अहं चैव करिष्यामि सृष्टिमेतां सनातनीं॥ इत्युक्तो ब्रह्मणे रुद्रो गुणरू
पी हरः स्वयं॥ कैलासं नाम चलं यावं निर्मितं ऋषिसत्तमाः॥ कैलाशे नागरं रम्यं पंचवक्त्रसहास हः॥
ब्रह्मांडस्य तथा नाशे नाशो नास्ति च यस्य वै॥ ततश्च मनसाः पुत्रा ब्रह्मणा निर्मितास्तदा॥ नारद
श्च प्रपाद्याश्च दश पुत्रा महाबलाः॥ दक्षपुत्री सती नाम्नी मुपेये मे सदाशिव॥ दत्ता दक्षेण सा
देवी भवानीति प्रकीर्त्यते॥ ब्रह्मा विष्णुश्च रुद्रश्च त्रयो गुणापुयत्र दद्भुतः॥ तथा गुणमयी देवी ल
क्ष्मीसत्वमुपाश्रिताः॥ राजसी च तथा ब्राह्मी तमोरूपा च सासती॥ गुणरूपा महालक्ष्मीयां वे रुद्र
मुपाश्रिताः॥ पुनश्च पार्वती जाता सा शिवं समुपागता॥ ततो नानान्यनेकानि जातानि ऋषीसत्त

शिवि.
१४

मा:॥कालिकाचंडिकाभद्राचामुंडाविजयाजया॥जयंतीभद्रकालीचदुर्गाभगवतीतिच॥कामाक्षा
कामदादेवीभुक्तिदामुक्तिदासती॥नामधेयान्यनेकानिप्राप्तापर्वतात्मजा॥गुणमय्यस्तथादेव्यो
देवागुणमयास्तथा॥मिलित्वाविविधांसृष्टिंचक्रुस्तेकार्यमुत्तमं॥इत्येवंवचनंश्रुत्वाऋषयोह्य
मलाशया:॥एवंततःपरंसोदिव्यांकथांचैवपुरातनीं॥अप्राप्यतृप्तिंतेसर्वेपप्रच्छुःपुनरेवतं॥
ऋषयऊचुः॥सूतसर्वंविजानासिप्रतापाच्चगुरोरिह॥त्वन्मुखांभोजसंभूतांपीत्वाहरिकथांव
यं॥नतृप्तास्मपुनस्तांचपातुमिच्छामहेवयं॥प्रथमंदक्षपुत्रीचपश्चाच्चपर्वतात्मजा॥कथ
मेकशरीरेणद्वयोःपुत्रीप्रजायते॥कथंवैपार्वतीपुण्यापुनःशिवमुपागता॥एतत्सर्वंतथा
न्यच्चसर्वंकथयितुमर्हसि॥तदुक्तंचतदाश्रुत्वासूतोवचनमब्रवीत्॥इतिशिवपुराणेरह
स्यसंहितानिरूपणंनामाध्यायः॥ ॥६॥ ॥सूतउवाच॥श्रूयतांऋषयःश्रेष्ठाःकथयामिशुभां

राम.
१४

कथां॥यच्छ्रुत्वासफलंजन्मभविष्यतिनसंशयः॥पूर्वंदक्षस्यरुद्रस्यस्पर्धाजातामहात्मनो॥ततो
दक्षःस्वयंयज्ञंकृतवान्देवसन्निधौ॥नाह्वयततयारुद्रंसर्वप्रमथसंयुतं॥तदादेवीसतीना
म्नीपुत्रीनाकारितायदि॥तथागतापुनस्तत्रनादृतापिपितुर्गृहे॥प्राप्यवज्ञांश्रुत्वातत्रदेह
त्यागमथाकरोत्॥यज्ञध्वंसेतदाजातेदेवलोकविवर्जिते॥रुद्रस्यानुचरैस्तत्रवीरभद्रादि
भिःकृते॥रुद्रेक्रुद्धेकथंलोकेसुखंभवतिसत्तमः॥पश्चाद्रुद्रःप्रसन्नोभूत्देवानांस्तवना
दपि॥पूर्ववच्चकृतंतेनकृपायुक्तेनमहात्मना॥रुद्रश्चपूजितस्तत्रदेवैर्देववरस्तदा॥सती
पूर्वदेहसमुत्पन्नाज्वालालोकसुखावहा॥पतितापर्वतेतत्रपूजितासुखदायिनी॥ज्वालामुखी
तिसाप्रोक्तासर्वकामफलप्रदा॥इदानींपूज्यतेलोकेःसर्वकामफलाप्तये॥सादेवीशैलरा
जस्यपत्नीमेनेतिविश्रुता॥पितृणांमानसीकन्यातस्यांजन्मसमादधे॥ततश्चपार्वतीनाम

29/1968

शि॰वि॰
१५

प्रसिद्धमन्ववन्तरं॥ सा पुनः शिवमाराध्य भर्त्तारं शिवमाश्रिता॥ भजतां सर्वलोकानां फलं यच्छत्य
नेकधा॥ एतत्सर्वं समाख्यातं यत्पृष्टोहं पुरातना॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः
॥ इति श्रुत्वा वचस्तस्य नैमिषारण्यवासिनः॥ पप्रच्छुः ऋषयः प्रेष्ठ कथां पापविशोधनीं॥ ऋष
य ऊचुः॥ सूत सूत महाभाग कथां पापपरिहारिणीं॥ श्रुत्वा च त्वन्मुखाद्देव नतृप्तास्म वयं प्रभो॥
पुनः कथय तत्सर्वं शिवस्याराधनं क्रमं॥ यस्य यस्य विधिः प्रोक्तो येनैवाराधितः शिवः॥ प्रसन्ने
न शिवेनैव यस्मै दत्तं फलं च यत्॥ पार्वत्या यत्कृतं पूर्वं शिवस्याराधनं पुनः॥ त्रिपुरस्य वध
श्चैव ज्योतिर्लिंगसमुद्भवा॥ ज्योतिर्लिंगानि कतिधा किं तेषां दर्शने फलं॥ ब्राह्मणैः क्षत्रियैर्वै
श्यैः शूद्रैर्वर्णिंनु रिज्यते॥ कथं कार्यं तथा ब्रूहि यथा व्यासमुखाच्छ्रुतं॥ तत् श्रुत्वा वचनं ते
षां सूतः परधर्मवित्॥ उवाच सकलं तत्प्रश्नस्यानुक्रमेण तु॥ सूत उवाच॥ ॥सम्य

रामः
१५

क्पृष्टं भवद्भिश्च यद्रहस्यं मुनीश्वराः तदहं कथयाम्यद्य यथाबुद्धि यथाश्रुतं॥ भवद्भिः पृच्छते यद्व
द्व्यासेनैव पुरा॥ पृष्टं सनत्कुमाराय तच्छ्रुतं त्वयमन्मुना॥ ततो व्यासेनवै श्रुत्वा शिवपूजादिकं
च यत्॥ २०० ॥ मयारोपितमेतेन लोकानां हितकाम्यया॥ यात्वं श्रुतं चैव कृष्णेन तु उपमन्योर्म
हात्मना॥ तदहं कथयिष्यामि श्रूयतां ऋषिसत्तमाः॥ वाक्यामिष्टं शृणु संक्षेपात् लिंगमर्चनवि
धिक्रमं॥ वक्तुं वर्षशतेनापि न शक्या विस्तरेण तु॥ एवं चन्द्रं करं रूपं सुखमीप्सुः सनातनं॥
पूजयेत्परया भक्त्या सर्वकामवराप्तये॥ दारिद्र्यं रोगदुःखं च संकटं शत्रुसंभवं॥ पापं चतुर्विधं ताव
त्त्या वन्नार्चयते शिवा पूजिते देवे नाश सर्व दुःखं विलीयते॥ यो वै मानुषमासाद्य सुखं संस्पृहः॥ ते
न पूज्यो महादेवः सर्वकामार्थसाधकः॥ ब्राह्मणाः क्षत्रियो वैश्याः शूद्राश्च विधिवत्क्रमात्॥ प्रातःका
ले समुत्थाय मूहूर्ते ब्रह्मसंज्ञिते॥ विधिमेश्च स्मरणं कृत्वा गुरोश्चैव तथा पुनः॥ तीर्थानां स्मर

31/1968

त्रि.वि.
१६

णां तिष्ठतु नित्यशः॥ ततः स्तोत्रं श्रुतं नाम गृह्णीयात् विधिपूर्वकं॥ तदोत्थाय मलोत्सर्गं दक्षिणे कृ
त्वा ध्यानं चैव हरेरिति॥ मेघश्यामं चतुर्बाहुं भक्तानाम भयप्रदं॥ तत्कुर्पं सुंदरं सर्वैकृद्दि स्यां दिशि
क्रमात्॥ एकांते तु विधिं कृत्वा मलोत्सर्गस्य मंत्रवित्॥ शुद्धं मृदं समादाय पंचवारं विशोध
येत्॥ क्षत्रियश्च चतुर्वारं वैश्यो वारत्रयं तथा॥ शूद्रश्चैव द्विवारं च पतितश्चैद्विधिश्च कः॥ ह
स्तौ पादौ च प्रक्षाल्यौ पूर्ववन्मृदमाहरेत्॥ स्त्रीणां च शूद्रसाम्येन मृदादिग्रहणं मतं॥ दंतका
ष्ठं ततः कुर्यात् द्वादशांगुलमानतः॥ एकादशांगुलं राजा वैश्यो दशांगुलं तथा॥ शूद्रो नवांगु
लं कुर्यात् मतिमान्नेव सीदति॥ कालदोषं विचार्यैवं सर्वं कर्तव्यमेव हि॥ स्नानं तु विधिवत् कार्यं राम.
मंतीर्थादिषु क्रमेण तु॥ देशकालाविरोधेन स्नानं कार्यं समंत्रकं॥ अचमनं प्रथमं तत्र धौतव १६
स्त्रं च धारयेत्॥ एकांते सुस्थले स्थित्वा संध्याविधिं समाचरेत्॥ मनस्कं सुस्थिरं कृत्वा पूजागारं

प्रविश्य च॥ पूजाद्रव्यं समादाय क्रमेण पूजयेद्धरं॥ प्रथमं च गणाधीशं द्वारपालांस्ततः परं॥ दिक्पा
लांश्च ततः पश्चात्ततः पीठं प्रकल्पयेत्॥ अथवाष्टदलं कृत्वा पूजाद्रव्यसमीपतः॥ उपविश्य ततः
स्तत्र उपलक्ष्य शिवं प्रभुं॥ आत्मनः सुस्थिरं कृत्वा प्रक्षाल्यं च पुनः पुनः॥ प्राणायामत्रयं कृ
त्वा मं ध्येद्देवं च त्र्यंबकं॥ पंचवक्त्रं दशभुजं शुद्धस्फटिकसन्निभं॥ सर्वाभरणसंयुक्तं व्याघ्रच
र्मोत्तरीयकं॥ तस्य सान्निध्यतां प्राप्य देहे स्थापनं ततः॥ शैवतंत्रमास्थाय यजेद्देवं परमे
श्वरं॥ देहशुद्धिं ततः कृत्वा मूलमंत्रं न्यसेत्क्रमात्॥ सर्वत्र प्रणवेनैव षडंगन्यासमाचरेत्॥ कृ
त्वादि प्रयोगं च ततः पूजां समारभेत्॥ तथा पाद्याचमनीये द्वे पात्रे संस्थापयेत्प्रथक्॥
धीमान् कुंडं प्रकुर्वीत दर्भैराच्छाद्य वारिणा॥ अनुक्ते तु पात्रेषु क्षिपेत्तोयं सुशीतलं॥ प्रण
वेन क्षिपेत्तेषु पात्रेषु त्रेषु प्रत्यजातकं॥ उशीरं चंदनं चैव पाद्ये तु परिकल्पयेत्॥ जातिकं

33
1968

कोलकर्पुरबकूमूलतमालकं॥ चूर्णयित्वायथान्यायंक्षिपेदाचमनीयके॥ एलांसर्वेषुपात्रेषुदा
पयेच्चंदनंतथा॥ पार्श्वतोदेवदेवस्यनंदीशंतुसमर्चयेत्॥ गंधैपुष्पैस्तथादीपैर्विविधैः शि
वपूजयेत्॥ लिंगंस्पृष्ट्वाततःकृत्वामुद्रायुक्तोनरस्तदा॥ तत्रसर्वाणिमंत्राणिवाप्रणवादिन
मोंतिकं॥ कल्पयेदासनंतत्रपद्मादिप्रणवेनतु॥ तस्यपूर्वदलेसाक्षादणिमामयमक्षरं
॥ लघिमादक्षिणेचैवमहिमापश्चिमेतथा॥ प्राप्तिश्चैवोत्तरेपत्रंप्राकाम्यंपावकस्यतु॥ ईशत्व
नैर्ऋतेपत्रेवशित्ववायुगोचरे॥ सर्वज्ञत्वंतथैशानेकर्णिकासोमउच्यते॥ सोमस्याधस्त
थासूर्यस्तस्याधःपावकःस्वयं॥ धर्मादयोपिर्प्रांतेषुतदधावाश्चतेघपि॥ अव्यक्तादिचतुर्दि
क्षुसोमस्यांतेगुणत्रयं॥ सद्योजातंप्रपद्यामित्यावाह्यपरमेश्वरं॥ वामदेवेनमंत्रेणति
ष्ठेद्वासनोपरि॥ सान्निध्यंरुद्रगायत्र्याअघोरेणनिरुध्यच॥ ईशानसर्वविद्यानामिति

35/1968

मंत्रेणपूजयेत्॥ पाद्यमाचमनीयंचविभोश्चार्घंप्रदापयेत्॥ स्नापयेत्विधिनारुद्रंगंधचंदनवा
रिणा॥ पंचगव्यविधानेनगव्यपात्रेविमंथ्यच॥ प्रणवेनैवगव्येस्तस्नापयेत्सयसाचतं॥ दध्ना
चमधुनावैवतथाचेक्षुरसेनच॥ घृतेनचतथापूज्यंसर्वकामहितावहे॥ पुण्यैर्द्रव्यैर्महादे
वंप्रणवेनाभिषेचयेत्॥ जलैर्नांडितैश्चैवस्नापयेत्परमेश्वरं॥ शुध्यंकृत्वायथान्यायंसि
तवस्त्रेणसाधकः॥ तावद्दूरंनकर्त्तव्यायावच्चंदनंक्षिपेत्॥ तंडुलैःसुदरैस्तत्रपूज
येच्छंकरंमुदा॥ कुशापामार्गकर्पूरजातिचंपकपाटलैः॥ करवीरैःसितैश्चैवमल्लिकाकम
लोत्पलैः॥ प्रअपूर्वप्रक्षैर्विविधैश्चंदनाद्यैश्चतत्फलैजलेनजलधाराचकल्पयेत्परमेश्वरे
॥ पात्रैश्चविविधैर्देवंस्नापायेत्परमेश्वरं॥ मंत्रपूर्वंप्रकर्त्तव्यापूजासर्वफलप्रदा॥ मंत्राणि
तेप्रवक्ष्यामिशृणुसर्वार्थसिद्धये॥ येनपूजाकृतालिंगेतेनसर्वंसुतोषितं॥ इतिशिवपुराणे

शिवपूजाविधिः॥ ॥१॥ ॥सूत उवाच॥ पवमानेन मंत्रेण तथा वाङ्मयकेन च॥ रुद्रेण नील
रुद्रेण सूक्तेन श्रुंचनेन च॥ रजनीसूक्तकेनैव यमलोकेश्रुमेन च॥ होत्रसूक्तेन शिरसा श्रुते
नाथर्वणेन च॥ प्रअथाग्निष्टेन साम्ना वामतथा देवव्रतेन च॥ रथंतरेण पुष्पेन सूक्तेन पुरुषेण
तु प्रसुजयेमंत्रनण पंचाक्षरेण वा पुनः॥ जलधारासहस्रेण शतमेकोत्तरेण वा॥ कर्त्तव्या
वेदमार्गेण नामभिरन्निवाद्य च॥ ततश्चंदनपुष्पादि रोपणीयं शिवोपरि॥ वादयेत्सर्वेनैण
वामुखवासादि दर्शयेत्॥ ततः स्फटिकसंकाशं देवं निष्कलक्षय॥ कारणं सर्वलोकानां स
र्वलोकमयं परं॥ ब्रह्मेंद्रविष्णुरुद्राद्यैरपि देवैरगोचरं॥ वेदविद्भिस्सवेदांते त्वगोचरमिति
स्मृतं॥ आदिमध्यांतरहितं तत्तेषजं सर्वरोगिणां॥ शिवतत्वमिति ख्यातं शिवलिंगे व्यव
स्थितं॥ प्रणवेनैव मंत्रेण पूजयेल्लिंगमूर्धनि॥ धूपदीपैश्चतांबूलैरा॥ त्रिकविधानतः

॥नमस्कारैस्तवैश्चान्यैर्मंत्रैर्नानाविधैरपि॥ स्तोत्रं जपं च विधिना नमस्कारः प्रदक्षिणा॥ अर्घं दत्वा तु पु 37/1968
ष्पाणि पादयोः प्रवीकीर्य च॥ प्रणिपत्य च देवेशमात्मना राधयेच्छिवं॥ हस्ते पुष्पं गृहीत्वा तु समुत्थाय
कृतांजलिः॥ प्रार्थयेत्पुनरीशानं मंत्रेणानेन वै शिवं॥ अज्ञानाद्यदि वाज्ञानाज्जपपूजादिकं मया
॥तदस्तु सफलं देव कृपया तव शंकर॥ पठित्वैवं तु तत्पुष्पं शिवोपरि न्यसेत्तदा॥ स्वस्त्ययनं ततः
कृत्वा आशिषो विविधास्तथा॥ मार्जनं तु ततः कृत्वा शिवोपरि न्यसेत्ततः॥ नमस्कारस्ततः क्षांति
ः पुनरागमनाय च॥ अघोरं च समुच्चार्य नमस्कारं प्रकल्पयेत्॥ प्रार्थयेच्च पुनस्तत्र सर्वभावसमन्वि
तः॥ शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम॥ इति संप्रार्थ्य
देवेशं सर्वसिद्धिप्रदायकं॥ पूजयेत्परया भक्त्या गद्यनादैर्विवादयेत्॥ नमस्कारं ततः कृत्वा प
रिवारगणैः सह॥ प्रहर्षमतुलं लब्ध्वा कार्यं कुर्याद्यथासुखं॥ एवं यः पूजयेन्नित्यं शिवभक्तिपरा

शि॰वि॰
१८

यणं॥ तस्यैव सकला सिद्धिर्जायते तु परे॥ कायेन वाचा मनसा यः शिवं पूजयेदिह॥ रोगं दुःखं च शो
कं च उद्वेगं कत्रिमं तथा॥ कौटिल्यं च गरं चैव यद्यद्दुःखमुपस्थितं॥ तद्दुःखं नाशयत्येव शिवः शिवं
करः परः॥ कल्याणं जायते तस्य शुक्लपक्षे यथा शशी॥ वर्द्धते तद्गुणास्तत्र शिवस्य पूजनात्ततः॥
एवं धर्माः मया प्रोक्ताः श्रुता व्याससुखाद्यथा॥ अतः परं प्रवक्ष्यामि कथां पापप्रणाशिनीं यां प्रश्नमान
वद्भिश्च तामहं विधिपूर्वकं॥ इति शिवपुराणे शिवपूजाविधिनामाध्यायः॥ ५॥ ॥ऋषय ऊचुः॥
॥ व्यासशिष्य महाभाग सम्यगुक्तं त्वयानघ॥ त्रिपुरस्य वधं ब्रूहि कथं वै त्रिपुरो हतः॥ किं रूपं त्रि
पुरस्यैव कुत्र वा विकृतिं गतः॥ किं सैन्यं तस्य दुष्टस्य शिवस्य च महद्बलं॥ एतत्सर्वं प्रयत्नेन राम॰
अन्यद्वा विविधं पुनः॥ कथनीयं त्वया सम्यक् येन त्वं बुद्धिमानसि॥ एवं वचस्ततः श्रुत्वा सूत १८
उवाच॥ ॥साधु पृष्टं महाभागाः लोकानां हितकाम्यया॥ यच्छ्रुत्वा सर्वलोकानां दुःखहानिर्भवि

39
1968

ष्यति॥ तारपुत्रो महामायी मायीनामपि मोहकः॥ सर्वदेवजयं कर्तुं तपस्तेपे सुदारुणं॥ मधोर्वनमु
पाश्रित्य गुर्वाज्ञापरिपालकः॥ ऊर्द्ध्वबाहुश्चैकपादो रविपंन्यस्तचक्षुषा॥ शतवर्षं तथा तप्त्वा शतमे
गुष्ठकेन च॥ शतमेकं जलेनैव शतमेकं तु वायुभुक्॥ शतमेकं जले तिष्ठन् शतमेकं तु स्थंडिले॥
शतमेकं तथा चाग्नौ शतमेकमधोमुखः॥ शतमेकं तु हस्तस्य तलेन च भुवं स्पृशन्॥ शतमेकं तु वृक्ष
णां शाखामालंब्य तिष्ठतः॥ अधोमुखं तु वर्षाणां शतमेकं गतं तदा॥ एवं कष्टतरं तप्त्वा त्वंतामपि
दुःसहं॥ तस्यैव शिरसस्तत्र तेजश्च निःसृतं महत्॥ तेनैव देवलोकास्तेन दग्धा यावन्नविरे॥ इंद्रश्च
न यमोपि देवस्य पदं धर्षयिष्यति॥ अत्यंतं दुःखमापन्नाः सर्वे देवास्तदा विभो॥ अकांडे चैव ब्रह्मांडं सं
हरिष्यति वै प्रभो॥ इति संशयमापन्ना निश्चयं नोपलेभिरे॥ तस्मिन् समये तेवै ज्ञात वै तोत्र
कारणं॥ ब्रह्माणं च समुद्दिश्य तपस्तप्यति दारुणं॥ इति निश्चयमापन्ना देवाश्चैव परस्परं॥ य

दिब्रह्मावरं तस्य न दास्यति समीप्सितं॥ तर्हि सर्वस्य तिलोकस्य विनाशो न भविता ध्रुवं॥ सर्वथा दुःखमा
पन्ना यदि नो दास्यते वरं॥ दास्यति चाव वरं तस्मै सर्वथा दुःखमागतं॥ यदी नोदीयते तस्मै वरो दुःखह
रोन्नणं॥ तथेदानी च लोकानां नाशो न भवितुमर्हति॥ यदि दत्तो वरस्तस्मै कालेनाशो न वेदिति॥
एतस्माच्च वरोह्यस्मै दातव्यो नात्र संशयः॥ इति कृत्वा मतिं देवा ब्रह्माणं समुपस्थिताः॥ तत्र गत्वा
च नत्वा च तस्मै सर्वं न्यवेदयन्॥ ब्रह्मा सर्वं सुनिश्चित्य देवाज्ञापरिसाधकः॥ वरं दातत्र जगाम हं
सवाहनः॥ यत्र वै तारको नाम तपस्तप्यति दारुणं॥ उवाच वचनं तत्र वरं ब्रूहि यथेप्सितं॥ तप
स्तप्तं महाघोरं नादेयं विद्यते तव॥ इत्येवं वचनं श्रुत्वा तारकाख्यो महासुरः॥ ब्रह्माणं प्रणिपत्यै
वं वरं वव्रे सुदारुणं॥ दैत्यो वाच॥ ॥ त्वयि प्रसन्ने वरदे किमसाध्यं न वैन्मम॥ यदि प्रसन्नो दे
वेशा यदि देयो वरो मम॥ वरं वृये तदा देयं श्रूयतां च पितामह॥ त्वया च मि निर्मिते लोके मृत्युर्योव

41/1968

भवान्नहि॥ शिववीर्यसमुत्पन्नः पुत्रः सेनापतिर्यदा॥ भूत्वा शस्त्रं क्षिपेन्मह्यं तदा मे मरणं भवेत्॥ इत्युक्ते
च तदा तेन ब्रह्मा लोकपितामहः॥ वरं च तादृशं दत्वा देवानुज्ञापरायणः॥ जगाम भवनं स्वीयं दाहशां
तिसमाहृतः॥ दैत्योपि तपसस्तस्मात् विरराम महावने॥ वरं लब्ध्वा मुनं तत्र शोणिताक्षख्ये पुरे ग
तः॥ इतस्ततश्च ये देवा दैत्यास्तद्भयव्याकुलाः॥ राजा भव त्वमस्माकं तारकाक्ष मथाब्रुवन्॥ अथ
सिक्तोसिंचे राजा दैत्याधीशो भवाधुना॥ इति संकल्पयतं लोकाः शोणिताक्षे पुरे तदा॥ तारकं प्रजया
मासुर्नानोपायनमार्पणयः॥ आज्ञां प्रवर्त्तयामास पृथिव्यां नान्यशासनं॥ ब्राह्मणाः क्षत्रिया वैश्याः शू
द्राश्चैवान्यजातयः॥ सर्वे पि पीडितास्तेन तारकेण दुरात्मना॥ देवाश्च दानवाश्चैव यक्षाः किंपुरु
षास्तथा॥ पीडिताः सर्वदेवेतेभ्यो रत्नमुपाददे॥ इन्द्रादि लोकपालैश्च स्वीयं रत्नं समर्पितं॥ इं
द्रेणोच्चैःश्रवास्तस्मै धर्मेण दंडरत्नकं॥ कुबेरेण तदा तस्मै निधयो नव चार्पिताः॥ वरुणेन हयाः

शिवि.
२१

दुग्धः ऋषिभिः कामधुक् तथा॥ यत्र यत्र शुभं दृष्टं तत्तदानीतवान् तदा॥ समुद्रस्य तथा रत्नान्यहार्त्तस्मै पुरामु
ने॥ सूर्यश्च तपते तद्वत्॥ यावद्दुःखं न जायते॥ चंद्रस्तु प्रमदा तुष्टो वायुः सर्वानुकूलवान्॥ देवानां हव्यं द्रव्यं य
त्पितॄणां कव्यमेव च॥ तत्सर्वं समुपादत्त असुरेण बलीयसा॥ त्रैलोक्यं चैव वशगं सर्वं तारकाज्ञापरायणं॥ यक्षा
किंपुरुषाश्चान्ये किंपुनर्मानवी द्रुमे॥ दिवौषधानि सर्वाणि तीर्थान्यपि महामुने॥ आनितानि गृहे तेन किंचि
न्नैवैवावशेषितं॥ एवं वर्षाण्यनेकानि गतान्यपि स्थितास्तथा॥ ते सर्वे च मिलित्वा तं ब्रह्माणं शरणं श्रिताः॥ इ
ति शिवपुराणे तारकभये देवगमनो नामाध्यायः॥ ॥९॥ ॥सूत उवाच॥ ॥ते सर्वे च तदागत्य ब्रह्माणं शर
णं गताः॥ नमस्कृत्य गतास्तत्र नम्रीभूता ऋषीश्वराः॥ तान्विषण्णान्सुरान्दृष्ट्वा ब्रह्मोवाच पितामहः॥ यू राम.
यमत्र कथं प्राप्ताः किं दुःखं भवतामिह॥ तदहं स्फोटयाम्यद्य यदि साध्यं भवेन्मम॥ इति तद्वचनं श्रुत्वा ब्र २१
ह्मणः परमर्षयः॥ देवाः सानुचराः सर्वे वचनं चेदमब्रुवन्॥ देवा ऊचुः॥ ॥भवतः किमपि विज्ञातं यद्दुःखं

43
1968

समुपस्थितं॥ तारकाद्दुःखमुत्पन्नं भवद्दत्तवरात्परात्॥ इत्येतद्वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत्॥ मत्तो नैवव
धो योग्यो मत्तो वृद्धिंगतस्य च॥ उपायं च दिशाम्यद्य शृणुतां देवसत्तमाः॥ ब्रह्मोवाच॥ ॥शिववीर्यसमुत्पन्नः पुत्र
श्चेन्यह निष्पत्ति॥ तच्चैव दुर्लभं देवाः विचारयत मा चिरं॥ बुद्धिरेखा समुत्पन्ना परं वक्ष्ये न वेद्मि तु॥ हिमव
च्छिखरे ह्यत्रोनुस्तप्यति नित्यशः॥ सखीभ्यां सहिता तत्र परिचर्यां शिवस्य ह॥ वचनान्नारदस्यापि तु मापि
त्रानुमानिता॥ करोत्यपरणास्तत्र तस्याः योसं गतां व्रजेत्॥ यदि स्मरारिवो देवस्तस्यां वीर्यसमावपेत्॥
ततश्चैव भवत्कार्यं भवेन्नात्र विचारणा॥ शिववीर्यं समाधातु ~~समर्थोस्ति तस्मादन्यो न कर्हिचित्~~॥ अ
मानान्यात ततः परा॥ यथा वीर्यमदीयं वै जलरूपधरः शिवः॥ समाधातुं समर्थोस्ति तस्मादन्यो न कर्हिचित्॥
तृष्योपायं च ते सर्वे मरुत्वंतं न्यवेदयन्॥ ब्रह्मणः सदनात्सर्वे देवाः प्रारयस्तथा॥ एकांते संस्थिताः सर्वे इन्द्र
मूचुः सुरर्षभाः॥ मघवन्नत्वया च कर्तव्यं ब्रह्मोक्तं वचनं महत्॥ तेन सिद्धिर्हि कार्यस्य नान्यथा च भविष्यति

त्रिवि. २२

॥इत्येवंवचनंदेवानिवेद्यशीघ्रतांततः॥स्वंस्वंस्थानंययुर्देवाःतारकागमनाद्रुताः॥गतेषुतेषुदेवेंद्रःस
स्मारमकरध्वजं॥आगतस्तत्रणंदेवस्यापुत्रःसख्यविष्णुः॥प्रणामंचततःकृत्वास्थित्वाप्रांजलिरब्र
वीत्॥किंकार्यंतेसमुत्पन्नंस्मृतोहंकेनहेतुना॥तत्वंकथयदेवेशातत्कर्तुंसमुपागतः॥इत्युक्त्वातु
महेंद्रायस्थितस्तद्धर्मीसहप्रीयः॥इंद्रोपिवचनंश्रुत्वाकंदर्पस्यस्मितमहात्मना॥उवाचवचनंसाधोयु
क्तमेतत्त्ववानघ॥इंद्रोवाच॥ ॥त्वयासाधुसमारंभिनियत्तेकार्यमुरीकृतं॥तत्कार्यंसर्वदेवानांधन्योसि
मकरध्वज॥प्रस्तुतंशृणुमेवाक्यंकथयामितवानघ॥मदीयंचैवयत्कार्यंतदीयंनकथंभवेत्॥त्व॥
मित्राणिममसंत्येवत्वत्तुल्यंनकदाचन॥जयार्थममदेवेननिर्मितंवज्रमुत्तमं॥अन्यदस्त्रंभवाने राम.
वदेवननिर्मितंपुरा॥वज्रंहिंसात्मकंविद्धिभवान्सुखकरंमतं॥द्वयोरपिभवान्श्रेष्ठःसर्वेगंसर्व २२
शक्तिमान्॥वज्रंचनिष्फलंस्याद्वैत्वंतुनैवकदाचन॥यतोहितंप्रजायेततोतःकोनुप्रियःपरः॥तस्मा

त्वंकाममित्रताकार्यंकर्तुमिहार्हसि॥ममदुःखंसमुत्पन्नमसाध्यंबहुकालजं॥केनापिनैवतत्संप 45/1968
हर्तुंत्वयाविना॥दातुःपरीक्षादुर्भिक्षेज्ञायतेचसतोनतिः॥शूरस्यैवचसंग्रामेमित्रस्यचतथाप
दि॥विपन्नोचतथास्त्रीणांविनयेनयेकुलस्यच॥स्नेहस्यचपरोक्षेणसत्यस्यसंकटेगते॥परीक्षा
तुत्वदीयाद्यमित्रपर्वभविष्यति॥नकेवलंमदीयंचकार्यंदेवसुखावहं॥वयांचयाचितारस्तेकार्यंका
र्यमुत्तमंचयत्॥इत्येवंमघवद्वाक्यंश्रुत्वातुमकरध्वजः॥उवाचप्रेमगंभीरगदगास्मितपूर्वकं॥का
मोवाच॥ ॥किमर्थंलाज्यसेदेववयंदासास्तवानघ॥उपकारस्तुलोकेस्मिन्कर्तुर्मिकथनेनच॥कम
र्तेनैवयोब्रूतेसकार्यंकिंकरिष्यति॥तथापिचमहाराजकथयामिशृणुष्वतत्॥मुक्तिमार्गेसमायुक्तेने
त्रात्तुंपातयाम्यहं॥तिपदंकर्षितोयोवैतपस्तप्यतिदारुणं॥क्षणेनपातयामस्यकटाक्षेणविद्धियोपथा॥
देवंवादानवंवापिऋषिंवादेवसत्तमान्॥मानुषाणांतपोभंगेगणनास्तिचेतसि॥वज्रंतिष्ठतुतेद्रस्त्रा

त्रिवि॰ २३

स्त्राणि विविधानि च ॥ किंते कार्यं करिष्यंति मयि मित्रे स्थिते प्रभो ॥ अन्येषां गणना नास्ति पातयामिह
रंयदि ॥ एवं तु वचनं तस्य श्रुत्वा हर्षमुपागतः ॥ उवाच प्रीणयन्वाचा कामं स्वपानां सुखावहः ॥ इंद्र उवाच
॥ यत्कार्यं मनसोद्दिष्टं दितत्कार्यं कथितं त्वया ॥ शृणु काम प्रवक्ष्यामि यदर्थं स्मरणं तव ॥ तारकाख्यो महा
दैत्यो ब्रह्मणो वरमुत्तमं ॥ संप्राप्य पीड्यते लोकान्नष्टधर्मा ह्यनेकशः ॥ दुःखिता देवताः सर्वे ऋषय
श्च तपोधनाः ॥ देवानां चायुधान्यत्र विफलानि च वै सुराः ॥ मरणं तस्य दुष्टस्य कदाचिन्नाविति चिंतये ॥ ए
तस्य मरणं प्रोक्तं शंभुवीर्यान्महात्मनः ॥ एतत्कार्यं त्वया साधु देवानां परमं सुखं ॥ ममापि च प्रियतरं लो
के कर्तुं समर्हसि ॥ शंभुस्तु गिरिजाशृंगे तपः परममाश्रितः ॥ तत्समीपे च सेवार्थं पार्वती सखीसंयुता राम॰
॥ तिष्ठते ऽत्र गौरी क्षणं पित्राज्ञप्तेति विश्रुतं ॥ यथा तस्यां रुचिः शंभोर्जायते परमात्मनः ॥ तथा कार्यं त्व २३
या साधो तव कार्यफलं तु सुखं ॥ कृतकृत्या भवंत्वेहि देवकार्ये सखी भव ॥ लोके स्थिरं यशः स्वस्छार्थ

हरणाद्धरधैर्यतः ॥ इत्युक्तस्तेन कामो वै प्रसन्नमुखपंकजः ॥ प्रेम्णा नाप्य करिष्यामि उपायं हरतपो
ग्रहे ॥ इत्युक्त्वा वचनं तस्मै तथेत्योमिति तद्वचः प्रणम्य मूर्ध्ना तरसा जगाम मधुना सह ॥ यत्रैव च हर
ः साक्षात्तपते परमं तपः ॥ तत्र गत्वा मधोश्चारो धर्मं विस्तारयन्स्थितः ॥ वसंतस्तद्वनं सर्वं प्रफुल्लं
कृतवान्क्षणात् ॥ वनानि च प्रफुल्लानि पादपानां महद्वने ॥ पुष्पाणि सहकारेषु अशोकानां व
नेषु च ॥ कुरुबकेषु पुष्पाणि भ्रमराकुलितानि च ॥ तिलकेषु विचित्रेषु कोकिलाकलकूजितं ॥
भ्रमराणां तथा शब्दो ह्यप्यनेको महावने ॥ चंद्रस्य विशदा कांति किरणा इति कारव ॥ मान
नीनां मानभंगे प्रेरितोपरवीपराः ॥ मारुतश्च सुखस्पर्शः बहुपुष्परजोयुताः ॥ वनौकसां तदा
तत्र मुनीनां विस्मयोद्भूतः ॥ अचेतनानां तत्रैव कामासक्तिर्हि जायते ॥ किं पुनः पटुचित्तानां वि
षयासक्तचेतसां ॥ अकालवर्त्तिं सुरभेर्वीक्ष्य देवो जगद्विभुः ॥ आश्चर्यं परमं गत्वा तपोचरत्त उ

·47· 1968

करं॥वसंतेप्रसूतेतत्रकामोरतिसमन्वितः॥नृतेबाणान्समाकृष्यस्थितःपार्श्वेतुवामतः॥रत्नायु
क्तंतथाकामंदृष्ट्वाकोवानमोहितः॥एतस्मिन्नंतरेदेवीपुष्पाभरणभूषिता॥सखीभिःसयुतात
त्रयत्रास्तिशंकरःस्वयं॥जगामशिवपूजार्थंनीत्वापुष्पाण्यनेकशः॥पृथिव्यांयद्द्वयंलोकेसौंदर्यं
विद्यतेमहत्॥तत्सर्वंचैकतस्तस्यांपार्वत्यांविधिनार्पितं॥आर्त्तवानिचपुष्पाणिधृतानि
चतयायदा॥तत्सौंदर्यंकथंवर्ण्यंतदावर्षशतैरपि॥यदाशिवसमीपेसागतापर्वतनंदि
नी॥तांदृष्ट्वाकर्षयच्चापंरुचमर्थंमूलपाणिनाः॥यथानिरंतरंसादेवपूजांकृत्वाकपालि
नः॥मालांकंठेसमाधातुंहस्ताभ्यांकमलैःकृतां॥तदातुकामदेवेनबाणःसंमोहनाभि
धः॥कर्णांतिकंविकृष्यैवमुक्तोमुक्तिफलंप्रति॥तदाशंभुर्महादेवःसर्वयोगपतिर्हरः
॥उन्मील्यलोचनेतत्रनारीलोलविलोचनां॥ददर्शांगेनिजेकामतप्तंसम्यग्वीक्षयंती

49
1968

॥शिवोपिवर्णयामासतद्रूपंसुंदरंतदा॥कासिकस्यासिकिंकार्यंकथयस्ववरोरु॥रूपेणप्रतिमा
लोकेद्वयसेगजगामिनी॥किंमुखंतेशशांकोवाकिंनेत्रेवाकिमुत्पले॥भ्रुकुटीधनुषीकिंवाकंद
र्पस्यमहात्मनः॥अधरःकिंबिंफलंकिंवाकोकिलवाक्स्वरः॥किंमध्येवेदिकाकिंवाकिंस्तनंवर्ण्य
तेतव॥पुष्पाणिचैववस्त्राणिलावण्यंतवसुंदरे॥एवंरूपंवर्णयित्वाविररामहरस्तदा॥हस्तंव
स्त्राचलेयावत्क्षिपतिस्मसदाशिवः॥तावद्दूरतस्तस्माद्गतानारीस्वभावतः॥वीवर्णवती
तयोगानिपश्यंतिचमुहुर्मुहुः॥एवंचेष्टांतदादृष्ट्वाशंभुर्मोहमुपागमत्॥यद्यालिंगनमेतस्यान
करोमिकृतःसुखं॥क्षणमात्रेविचार्यैवंशंभुःस्वांप्रकृतिंगतः॥ईश्वरोहंयदीच्छेयंपरांगसंगजां
मुदं॥ततःकोन्योजनोधैर्यंकिंत्वितिचेतसिकातरः॥एवंवितर्कयामासदृसदृटपर्यंकबंधनां॥स्फो
टयामासविस्मात्माईश्वरःकिंपतेदिह॥इतिशिवपुराणेशिवतपोवर्णनोनामाध्यायः॥१०॥ ॥

॥ऋषय ऊचुः॥ ॥सूत सूत महाभाग किं जातं च ततः परं॥ कथयत्वं प्रसादेन कथां पापप्रणाशनीं॥
सूतोवाच॥ श्रूयतां ऋषयः श्रेष्ठाः प्रजातं तदनंतरं॥ धैर्यस्य वसने दृष्ट्वा विचचार हरः स्वयं॥ को
विकारः समुत्पन्नो मम धैर्यापहारकः॥ देवैश्च दानवैश्चैव ऋषिभिः सिद्धचारणैः॥ अन्यैरोभिर्निर्जि
तोस्मि विकारं नेतुमीदृशं॥ दिशो विलोकयामास परितः शंकरस्तदा॥ वामभागे स्थितं कामं ददृ
शे बाणकर्षिणं॥ तं दृष्ट्वा क्रोधसंसक्तो जातस्तत्क्षणरः॥ अहो दुष्टेन कामेन न मुक्तो हं दुरासदः
॥इत्येवं मनसा कृत्वा शिवः परमकोपनः॥ तृतीयात्भालनेत्रात्तु सप्तजिह्वो बभूव ह॥ ऊर्ध्ववि
हृताकारः पतितः काममस्तके॥ यावद्देवगिरा क्रोध संकोच हर संहर॥ तावद्भस्मीकृतः कामो
भस्मत्रोषेण वत्तदा॥ हते तस्मिन्महावीर्ये देवा दुःखमुपागताः॥ शिवोपि तत्क्षणादेव विहाय श्र
ममन्यतः॥ जगाम सगणः साक्षात् हरः पुरंजयः॥ गिरिराजसुता तत्र जगाम भवनं पितुः॥ ह

51
1968

तः संकल्पकल्पनासखीसां संयुता सखी॥ क्षणमात्रे रतिस्तत्र विसंज्ञा च भवत्तदा॥ नष्टं जन्मं च मे दुःखं न ज्ञा
तं ऋषिसत्तमाः॥ जातायां चैव संज्ञायां रतिर्दुःखसमन्विता॥ विललाप रतिस्तत्र वनमासीत्सुदुःखितं॥
मयूराश्चैव नृत्यं हि वृक्षाश्च चलनं जहुः॥ मृगाश्च चर्वणं तत्र भ्रमराश्च गुंजनं पुनः॥ पक्षिणश्च तदा त
त्र मुक्ताश्च मुनयो यथा॥ वायवश्चलनं तत्र हित्वा नो वांति वै दिशः॥ किं करोमि क्व गच्छामि किं कृतं दैव
तैरिह॥ मम दुर्भाग्यवादेन तज्जातं कामस्य वै हसे॥ हस्तौ पादौ तथा स्फाल्य केशान् नुत्रोटयत्तदा॥ ब्रह्मा
णा सदृशो योगी न सोढेम मकर्मणः॥ दुःखदाता न कोप्यस्ति दुःखदाता न कश्चन॥ सर्वेपि स्वकृतं भुं
क्तेनि ध्यात्रो कार्यं प्रजाः॥ तद्विलापमिमं श्रुत्वा देवाः शिवमुपाययुः॥ श्रुत्वा देवं प्रसाद्यैव वचनं चेदम
ब्रुवन्॥ देवा ऊचुः॥ ॥भगवन् श्रूयतामेतद्वचनं च मम प्रभो॥ कामेन वै कृतं यच्च न स्वार्थे लोककरः
॥दुष्टेन पीडितैर्देवैः कारितोयं वधश्च सः॥ रतिरेकाकिनी देव विलापं कुरुते सती॥ शंकरोति जगत्

शि॰वि॰
२६

वं तस्मात्त्वं शंकरोमतः॥ संहारे कर्तुमेकोसि तदा देवैश्च संहर॥ दुःखं तस्यास्तथा दृष्ट्वा नष्टप्रायाश्च दे
वताः॥ तस्मात्त्वया च कर्तव्यं त्वया शोकापनोदनं॥ नमस्कृत्य तदा देवाः स्तुतिं कृत्वा विधानतः॥ प्रस
न्नं दृष्ट्वा तं रुद्रं स्थिताः सर्वे दिगीश्वराः॥ प्रसन्नो नगवांस्तत्र वचनं चेदमब्रवीत्॥ शिव उवाच॥ शृ
ण्वंतु देवताः सर्वे जज्ञातेनान्यथा नवेत्॥ अनंगस्तावदेवस्यात् यावत्ररुक्मिणीपतिः॥ द्वारकायां स्व
ये स्थित्वा पुत्रान्युत्पादयिष्यति॥ तदा कृष्णाच्च रुक्मिण्यां कामः प्रादुर्नविष्यति॥ प्रद्युम्न इति तन्नाम
नविष्यति न संशयः॥ जातमात्रं सुतं देवं संबरः संहरिष्यति॥ कृत्वा कूपारके प्रास्य नगरं संगमि
ष्यति॥ ततो मत्स्यमुखे देवः पतितस्तं गलिष्यति॥ समत्स्यो जालकैर्बद्धो राजवेश्मनि नविष्यति॥ ताव
च्च नगरे स्थेयं तस्य इत्थाय यथा सुखं॥ तत्र कामे मिलित्वा च हत्वा शंबरमाहवे॥ तदीयं चैव तद्द्रव्यं नी
त्वा द्वारवतीं पुनः॥ गमिष्यति स्वयं देवा सोसत्यं वचनं मम॥ इत्युक्त्वांतर्दधे रुद्रे देवानास्तवतोत

राम॰
२६

दा॥ देवास्तां च समासाद्य रुद्रस्य वचनं यथा उक्त्वा निगम्य तस्थानं स्वं नवनमाययुः॥ कामपत्नी यथा
दिष्टं नगरं सा गता तदा॥ प्रतीक्षंती च तं कालं रुद्रादिष्टं मुनीश्वरा॥ देवाश्च दुःखिताः सर्वे हा हा
किं च नविष्यति॥ तारकस्य कथं नाशो नविष्यतीति चक्रुशुः॥ पितुर्गेहे तदागत्वा मिलित्वा मात
रं मुदा॥ पुनर्जातिं तदा तस्मा नेमिनेसा पर्वतात्मजा॥ निंदयामास स्वं रूपं हा हतास्मि तदाब्रवीत्॥
स्वपतिं च पिबंति च ह्यस्मिंति गच्छती सदा॥ तिष्ठंति च सखी मध्ये अधिकरूपं दैमदीयकं॥ इति सा दुः
खीत्वा तत्र उवाच पर्वतात्मजा॥ एतस्मिन्समये तत्र नारदश्च गमत्तदा॥ पूजितः सुखमासी
नः प्रष्टः प्राप्तिं शिवस्य च॥ उक्तवान्वचनं तत्र तपः साध्यो हि शंकर॥ ततः प्रोवाच सा देवी मंत्रं
देहि महाप्रभो॥ गुरुं विना न सिध्येत श्रुतिरेखा सनातनी॥ इति तस्याः वचः श्रुत्वा उपदेशान्न
मस्कृत्य तदा॥ विचार्य मुनीवर्यस्तां विधिपूर्वमुपादिशत्॥ नान्यथा लप्स्यते शंभुरिति वाचमथाब्र

53/1961

शि.वि.
२७

वीरः॥ इत्येवं वचनं तस्मै नारदो गाव स्त्रियः॥ जगाम सह रेनाम गणान्हाराय णेतिंच॥ इति शिव
पुराणे पार्वतीनारद संवादो ध्यायः॥ ११॥ ॥सूत उवाच॥ ॥पार्वती च तदा श्रुत्वा वचनं नारदस्य च॥
तपः साध्यं हरं मेने तयोर्थे मन आदधे॥ मातरं पितरं चैव सखीभ्यां पर्यपृच्छत॥ सख्युवाच॥ हि
मवान् श्रूयतां पुत्र्याः वचनं कथ्यते धुना॥ साफल्यं चैव देहस्य रूपस्य च तथा पुनः॥ स्वतस्य कुल
स्यास्य समलं कर्तुमिच्छति॥ तपसाराधनेनासौ नान्यथा वशतां व्रजेत्॥ तस्माच्च पर्वतश्रेष्ठ दे
या ज्ञा न वता धुना॥ इत्येवं च तदा श्रेष्ठो गिरिराजो ब्रवीद्दिदं॥ हिमालय उवाच॥ मह्यं च रोचते सख्यौ
मेनायै रुच्यतां पुनः॥ यदि वं न वितयं च किमतः परमुत्तमं॥ साफल्यं च मदीयस्य गृहस्य च यस रामं
त्राः॥ तन्मात्रे रुच्यतामेतत् किमतः परमुत्तमं॥ इत्येवं वचनं तस्य श्रुत्वा सख्यौ च ते तदा॥ गत्वा २७
तु मातरं तस्याश्च वचनं वदतुस्ततः॥ मातस्त्वं वचनं पुत्र्याः श्रुत्वा कर्तुमिहार्हसि॥ तप्तुं का १

55/1968

मास्ति ते पुत्री शिवार्थे परमं तपः प्राप्तानुज्ञा पितुश्चैव तु त्वं च परिपृच्छति॥ इयं यत्तपसा साफल्यं क
र्तुं कामापि विद्यते॥ त्वदाज्ञायदि जायेत तत्प्यते च तयाधुना॥ समाकर्ण्य वचस्त्वेतन्मेना दुःखमुपाग
ता॥ समाहूय तदा पुत्रीमुवाच विकलासती॥ दुःखितासि कथं पुत्री तपस्तप्तुं पुरा म्यदि॥ तप्तं चैव गृ
हे सम्यक् देवपूजादिकं कृतं॥ कुत्र यासि तपः कर्तुं देवाः संति गृहे मम॥ तीर्थानि च विचित्राणि नतेसं
ति पितुर्गृहे॥ त्वया चात्रैव यत्कार्यं कर्तव्यमनपायितत्॥ साधितं किं त्वया गत्वा पुनः किं साधयिष्यति
॥ शरीरं कोमलं वत्से तपस्तु कठिनं महत्॥ एतस्मात् हि त्वयैकार्यं तत्तेव सुलभं भवेत्॥ इत्येवं
बहु धा दुःखात्मात्रापि वारितासती॥ मुखेन नो पुनर्वाचमुवाच कृतनिश्चया॥ मातर्नैवात्र संदेह
तपः साध्यो हि शंकरः॥ कृते तेनैव शंकरं निघ्नं न जीवामि सत्यं त्विह॥ दुराग्रहं तदीयं च माता तां विस
सर्जेह॥ मातापितरौ तस्यैव प्रणिपत्य पुनस्तदा॥ सखीभ्यां से पुता तत्र तपस्तप्तुमुपाययौ॥ हित्वा

शिवि॰
२९

स्यान्यनेकानि वस्त्राणि विविधानि च॥ वल्कलं च तदा धृत्वा मुंजीं बध्वा सुशोभनां॥ हित्वा हारं तदा चर्म
मृगस्य परमं शुभं॥ जगाम तपसे तत्र गंगोत्रीतीर्थमुत्तमं॥ गौरीशिखर नामासीत्तपसः कारणाद्धि
ह॥ सुंदरश्च कुमारस्तत्र पवित्रफलाजिनः॥ भूमिशुद्धिं ततः कृत्वा विधाय वेदिकां शुभां॥ तया तपः
समारब्धं मुनीनामपि दुष्करं॥ वाचं कं वै समास्थाप शरीरं पापवर्जितं॥ कृत्वा मूलादि बाह्यं तत
पोत्तीष्टत्तपस्विनी॥ दीप्ताग्नौ च तथाग्नीनां मध्ये स्थित्वा तु घर्मके॥ वर्षासु स्थंडिले स्थित्वा शीते ज
लसमीपतः॥ एवं तपः प्रकुर्वाणा वृक्षान्नारोपयत्तथा॥ सिंचिंतीमत्सहं तत्र ह्यातिथ्यं चापक
ल्पयत्॥ वातश्चैव तथात्युष्णो वृष्टिश्चैव तथाविधिः॥ दुःखं वनगणितं तत्र विविधं तु तया तदा
॥तथा तया तपस्तप्तं मुनिभिश्च सुदुष्करं॥ श्रुत्वा च मनयस्तत्र विस्मयं परमं गताः॥ दर्शना
र्थं समाजग्मुः कदृकृतपस्तपोनया॥ महता धर्मवर्द्धेषु गमनं श्रेय उच्यते॥ प्रमाणं वयसो ना

रुम॰
२९

57
1968

स्ति मान्यो धर्मः सदा बुधैः॥ श्रुत्वा दृष्टा तपस्तस्याः किं मुनैः क्रियते तपः॥ जल्पंतस्ते तदान्यत्र कविगां
गृह्णये पुनः॥ तदाश्रमगता ये च विरोधा हि रेता स्तदा॥ सिंहा गावस्तथान्ये च रागद्वेषविवर्जिता॥
तन्महिम्ना न बाधंते परस्परविरोधिनः॥ वृक्षाश्च सफलास्तत्र तृणानि विविधानि च॥ पुष्पाणि च
त्राणि तत्रासन् ऋषिसत्तमाः॥ तद्वनं च तदा सर्वं कैलाशेन समन्वितं॥ जाते च तपतस्तस्याः सिद्धिसा
रस्वतं परं॥ इति श्रीशिवपुराणे पार्वतीतपवर्णनो नामाध्यायः॥१२॥ ॥एतस्मिन् समये देवा ऋषयो ना
रदादयः॥ पार्वत्याश्च तपो दृष्ट्वा तेजसा व्यापितास्तदा॥ जग्मुस्ते च तदा तत्र यत्रास्ते वृषभध्वजः॥
तत्र गत्वा च ते देवाः नारदं प्रेरयन्तदा॥ नारदोपि तदा गत्वा देवानां कार्यकृद्विभुः॥ प्रणम्य शंक
रं देवं स्तुतिं चक्रे च तैः सह॥ नारद उवाच॥ शंभुस्त्वं शंकरोसि त्वं दयालुस्त्वं विशेषतः॥ पार्वत्या
स्तेतपस्तप्तं दारुणं लोकशोषणं॥ प्रीतान्नवत्वमस्माकं कुरु देवी मनोरथं॥ इत्युक्त्वा च तदा देवा

शि॰वि॰
२९

त्वं विसर्ज्य लोकश्चांकरं ॥ जटिलं रूपमास्थाय जगाम पार्वतीवनं ॥ आगतं चातिथिं देवी पूजया पूज
यत्तदा ॥ अंगेषु लोमशं धूम्रं दंड चर्मसमन्वितं ॥ अहृष्यसंस्थो च गुर्वी एया पूजया पर्यपूजयत् ॥
फलपुष्पादिभिस्तत्र पूजितं परया मुदा ॥ पार्वती कुशलं तं वै पप्रच्छ विष्टरे स्थितं ॥ कुत आगमनं जा
तं आश्रमः सफलीकृतः ॥ इति पृष्टस्तया तत्र जाउवाच जटिलस्तदा ॥ तीर्थात्तीर्थांतरं त्वद्य गच्छतो मम
नित्यशः ॥ यदृच्छया दर्शनं ते घजातं पवित्ररूपये ॥ अथ देवी क्षणं स्थित्वा विनिनीय च परिश्रमं ॥ उवा
च कपटेनैव गोपयन् रूपमात्मनः ॥ जटिलोवाच ॥ ॥ अयि देवि जलं ह्येतत्फलानि च निरंतरं ॥
अन्वच्छिन्नं वर्त्तते ते यथा शक्ति तपस्यसि ॥ न वेद्मि यसि यद्देवि कृतं ते तप उत्तमं ॥ अत्र किंचित् राम
हितं प्रष्टेकथनीयं त्वया धुना ॥ पूजाविधिकृतो देवी सर्वथा सा प्रसादिकः ॥ उक्तो मे त्वीच संजा २९
तां गोप्यं न च रहस्यकं ॥ पृष्टुमिच्छामि देवेशि किंनिमित्तं तपस्तव ॥ परं त्वय्येव तपसो फलं सर्वं

प्रदृश्यते ॥ वरार्थं चेत्तपस्ते स्ति तदा तिष्ठतु ते तपः ॥ रत्नं चेव गृह्णीतारं नेव एच्छति मां न ज ॥ इदृशं
सर्वसौंदर्यं तपसा विफली कृतं ॥ हित्वानरणान्यनेक यं च मत्त्वयाधृतं ॥ न म सर्वं च कथय प जाने का
रणं तव ॥ तदा सखीतया देवा संज्ञेया चक्षुषा सती ॥ त्वन्मुखेनैव कथय यतो सौ साधु वेदिता ॥
॥ इति श्रीशिवपुराणे पार्वतीबटुकसमागमो नामाध्यायः ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ पार्वत्या प्रेरि
ता देवी जया दैन्यपुरं जया ॥ उवाच जटिलं तत्र साभिलाषं च वर्णिनं ॥ जया उ॰ शृणु साधो प्रव
क्ष्यामि यदि त्वं श्रोतुमिच्छसि ॥ यदर्थं तेन या सस्या घोरं परमं तपः ॥ हित्वेंद्रप्रमुखान् देवान्
ऐश्वर्य संयुतानपि ॥ पतिं पिनाकपाणिं वै शंभुमिच्छति सा प्रतं ॥ इयं सखी मदीया वै वृक्षा
न्नारोपयत्पुरा ॥ तेषु वृक्षेषु संजातं फलं पुष्पं रसस्तथा ॥ मनोरथां कुरुस्तस्याः पुष्पिता पि
हैनेद्दृश्यते ॥ रूपहार्यः शिवो नास्ति मदनास्यापि निग्रहात् ॥ पश्चाच्च नारदादेशेन तपस्तप

57/1968

शि॰वि॰
३०

तिर्दारुणं ॥ यत्ते पृष्टं मयाख्यातं समासेन तपोधन ॥ इत्येवं वचनं श्रुत्वा जटिलो वाक्यमब्रवीत् ॥ जटिल
उवाच ॥ ॥ सख्येदं कथितं तथ्यं परिहास उतापि वा ॥ यथार्थेन कथं देवी मुखेन परिभाषसे ॥ इत्युक्ता
च सा तदा तेन सखी येनैव सखी तदा ॥ उवाच पार्वती देवी तत्तथैव न चान्यथा ॥ मनसा वचसा साक्षाद्वृतो
सौ शंकरो मया ॥ जानामि दुर्लभं वस्तु कथं प्राप्यं मया भवेत् ॥ तथापि मनसोत्सुक्यात्तप्यते च म
या तपः ॥ इत्युक्त्वा वचनं तस्मै स्थिता सा गिरिजा तदा ॥ उवाच ब्राह्मणस्तत्र मया च गम्यते धुना ॥
एतावत्कालपर्यंतं मम इच्छा महती ह्यभूत् ॥ किं चैव काम्यते देवा यत्किंचित्तन्नविताशुतं ॥ अव
गतं मया सम्यक् स्मृतिवाक्यं च निष्फलं ॥ जातं मन्ये विद्यालाक्षितं त्वन्मुखाद्वचने श्रुते ॥ इतो
गच्छाम्यहं देवि यथेच्छसि तथा कुरु न कथ्यते मया तु सं मित्रत्वान्निष्फलं भवेत् ॥ यथा का
र्यं यथा भावि तथा भवति नान्यथा ॥ इत्युक्त्वा वचनं तस्यै यावद्गंतुमियेष सः ॥ तावच्च पार्व
राम
३०

61
1968

ती देवी उवाच किं गमिष्यसि ॥ इत्युक्ते च तया तत्र स्थित्वो वाच सदंडधृक् ॥ जटिलो वाच ॥ ॥ शृणु देवी प्र
वीतभयोविश्वभर्त्तानिवारितः॥नित्योनियतकल्याणःपुण्यश्रवणकीर्तनः॥दूरश्रवाविश्व
सहोध्येयोदुःस्वप्ननाशनः॥उत्तारणोदुष्कृतिहाविज्ञेयोदुःसहोभवः॥अनादिर्भूर्भुवोलक्ष्मी
ःकिरीटीत्रिरीटीत्रिरीटीत्रिदशाधिपः॥विश्वगोप्ताविश्वकर्तासुवीरोभीमपराक्रमः॥प्रण
वःसत्पथाचारोमहाकोशोमहाधनः॥जन्माधिपोमहादेवःसकलागमपारगः॥तत्त्वंतत्त्व
विदेकात्माविभुर्विश्वविभूषणः॥ऋषिर्ब्राह्मणऐश्वर्यजन्ममृत्युजरातिगः॥पंचयज्ञस
मुत्पत्तिर्विश्वेशोविमलोदयः॥अनाद्यंतआत्मयोनिर्वत्सलोलोकधृक्॥गायत्रीवल्लभः
प्रांशुर्विश्वावासःप्रभाकरः॥शिशुर्गिरिरतःसम्राट्सुषेणःसुरशत्रुहा॥अनेमिरिष्टने
मिश्चमुकुंदोविगतज्वरः॥स्वयंज्योतिस्तनुज्योतिरचंचलः॥पिंगलःकपिलश्मश्रुर्भालने

407
1968

शिवि·
२०१

यीतनुः॥ज्ञानस्कंदोमहानीतिर्विश्वोत्पत्तिरुपप्लवः॥भगोविवस्वानादित्योयोगपारोदिवस्पति
॥कल्याणगुणनामाचपापहापुण्यदर्शनः॥उदारकीर्त्तिरुद्योगीसद्योगामहसन्मयः॥नक्ष
त्रमालीनाकेशःस्वाधिष्ठानपदाश्रयः॥पवित्रःपापनाशश्चमणिपूरोनभोगतिः॥हृत्पुंड
रीकमासीनःशक्रःशांतोवृषाकपिः॥ऊष्णोगृहपतिःकृष्णःसमर्थोनर्थनाशनः॥अधर्म
शत्रुरज्ञेयःपुरुहूतःपुरुश्रुतः॥ब्रह्मगर्भोबृहद्गर्भोधर्मधेनुर्धनागमः॥जगद्धितैषीसुग
तःकुमारःकुशलागमः॥हिरण्यवर्णोज्योतिष्मान्नानाभूतरतोध्वनिः॥अरोगोनियमा
ध्यक्षोविश्वामित्रोद्विजेश्वरः॥ब्रह्मज्योतिर्वसुधामामहाज्योतिरनुत्तमः॥मातामहोमात राम·
रिश्वानभस्वान्नागहारधृक्॥पुलस्त्यःपुलहोगस्त्योजातूकर्ण्यःपराशरः॥निरावरण २०१
निर्वारोवैरंच्योविष्टरश्रवाः॥आत्मभूरनिरुद्धोत्रिर्ज्ञानमूर्त्तिर्महायशाः॥लोकवीरा

ग्रणीवीरश्चंडःसत्यपराक्रमः॥व्यालकल्पोमहाकल्पःकल्पवृक्षःकलाधरः॥अलंकरिष्णुरचलो
रोचिष्णुर्विक्रमोन्नतः॥आयुःशब्दपतिर्वेगीप्लवनःशिखिसारथिः॥असंसृष्टोतिथिःशक्र
ःप्रमाथीपादपासनः॥वसुश्रवाहव्यवाहःप्रतप्ताविश्वभोजनः॥जप्योजरादिशमनोलो
हितात्मातनूनपात्॥बृहदश्वोनभोयोनिःसुप्रतीकस्तमिस्रहा॥निदाघस्तपनोमेघःस्व
क्षःपरपुरंजयः॥सुखानिलःसुनिष्पन्नःसुरभिःशिशिरात्मकः॥वसंतोमाधवोग्रीष्मोनभ
स्योबीजवाहनः॥अंगिरागुरुरात्रेयोविमलोविश्ववाहनः॥पावनःपुरुजिच्छक्रस्त्रिविद्यो
नरवाहनः॥मनोबुद्धिरहंकारःक्षेत्रज्ञःक्षेत्रपालकः॥जमदग्निर्जलनिधिर्विगालोविश्व
गालवः॥अघोरोनुत्तरोयज्ञःश्रेयोनिश्श्रेयसालयः॥शैलोगगनकुंदाभोदानवारिररिं
दमः॥चामुंडाजीवकश्चारुर्निःशल्योलोकशल्यधृक्॥चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः॥आम्ना

ग्रोप्यसमाम्नायस्तीर्थदेवश्शिवाजयः॥बहुरूपो महारूपः सर्वरूपाश्चराचरः॥न्यायनिर्मा
यको न्यायी न्यायगम्यो निरंजनः॥सहस्रमूर्द्धा देवेंद्रः सर्वशास्त्रप्रभंजनः॥मुंडो विरूपो वि
कृतो दंडी दांतो गुणोत्तमः॥पिंगलाक्षो बहुलाक्षो नीलग्रीवो निरामयः॥सहस्रबाहुः सर्वे
शः शरण्यः सर्वलोकधृक्॥पद्मासनः परंज्योतिः परंपारं परं फलं॥पद्मगर्भो महागर्भो वि
श्वगर्भो विचक्षणः॥चराचरज्ञो वरदो वरेशस्तु महाबलः॥देवासुरगुरुर्देवो देवासुरन
मस्कृतः॥देवासुरमहामात्रो देवासुरमहाश्रयः॥देवादिदेवो देवर्षिर्देवासुरवरप्रद
॥देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः॥देवदेवमहाचिंत्यो देवतात्मात्मसंभवः॥स
द्योनस्यसुरव्याघ्रो देवसिंहो दिवाकरः॥विबुधाग्रचरश्रेष्ठः सर्वदेवोत्तमोत्तमः॥
शिवज्ञानरतः श्रीमान् शिखी श्रीपर्वतप्रियः॥वज्रहस्तः सिद्धखड्गी नरसिंहनिपात

नः॥ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः॥नंदी नंदीश्वरो नंतो नग्नव्रतधरः शुचिः॥लिं
गाध्यक्षः सुराध्यक्षो योगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः॥स्वधर्मा स्वर्गतः स्वामी
स्वरः स्वरमयः स्वनः॥बाधाध्यक्षो बीजकर्त्ता धर्मकृत् धर्मसंभवः॥दंभोऽलोभोऽर्थवेच्छं
भुः सर्वभूतमहेश्वरः॥श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः॥लोकोत्तरः स्फुटालोक
स्त्र्यंबको नागभूषणः॥अंधकारिर्मखद्वेषी विष्णोः स्कंधरवात्मनः॥हीनदोषोऽक्षयगुणो
दक्षारिः पूषदंतभित्॥धूर्जटिः खंडपरशुः सकलो निःकलोनलः॥अकालः सकला
धारः पांडुरांगो मृडो नगः॥पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः॥सामगेयः प्रियो
क्रूरः पुण्यकीर्तिरनामयः॥मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः॥जीवितांतकरो नि
त्यो वसुरेता वसुप्रदः॥सद्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकंटकः॥कलाधरो महा

411
1968

त्रिवि॰ २०५

कालज्ञः सत्यपरायणः ॥ लोकनाथ एककर्त्ता च लोकोत्तरसुखालयः ॥ चंद्रसेनतीव्रते
जोमयो द्युतिधरो लोकमानाग्रणीरणुः ॥ शुचिस्मृतः प्रसन्नात्मा रजोपांडुरतिक्रमः ॥ ज्योति
र्मयो ॥ निरोजो मोगंधाष्टो मजलेश्वरः ॥ तुंबवीणो महाकायो विशोकः शोकनाशनः ॥ त्रिलो
केशः सर्वशुद्धिरधोक्षजः ॥ अव्यक्तलक्षणो देवो व्यक्तो विशांपतिः ॥ परःशिवो वसुर्नासा
रो ॥ मानेंधनोपमः ॥ ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥ वेधा विधाता स्रष्टा
च संहर्त्ता चतुर्मुखः ॥ कैलासशिखरावासी सर्ववासी सदागतिः ॥ हिरण्यगर्भो द्रुहि
णो भूतालोपोथ भूपतिः ॥ सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥ देवप्रियो देवनाथो राम॰
देवको देवचिंतकः ॥ विषमाक्षो विरूपाक्षो वृषदो वृषवर्द्धनः ॥ निर्ममो निरहंकारो २०५
निर्मोहो निरुपद्रवः ॥ दर्पहा दर्पदो दृप्तः सर्वर्षिपरिवर्त्तकः ॥ सहस्रजित्सहस्रार्चिः

स्निग्धप्रकृतिदक्षिणः ॥ भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः ॥ अर्थो नर्थो महाकोशः परका
र्यैकपंडितः ॥ निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ॥ सत्ववान् सात्विकः सत्यः कीर्तिस्नेह
कृतागमः ॥ अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ सुप्रीतः सुमुखः सूक्ष्मः सुकरो
दक्षिणानिलः ॥ नंदिस्कंधधरो धुर्यः प्रकटः प्रीतिवर्द्धनः ॥ अपराजितः सर्वसत्वो गोविंदः
सत्ववाहनः ॥ अधृतः सिद्धः पूतमूर्त्तिर्यशोधनः ॥ वाराहशृंगधृग्बलवानेकनायकः ॥ श्रु
तिमानेकबंधुरनेककृत् ॥ श्रीवत्सलः शिवारंभः शांतभद्रः समो यशः ॥ भूशयो भूषणो भू
तिर्भूतिकृद्भूतिभावनः ॥ अकंपो भक्तिकायस्तु कालहानिः कलाविदुः ॥ सत्यव्रतो महात्यागी
निस्त्रांतिपरायणः ॥ परार्थवृत्तिर्वरदो विविक्षुस्तुविशारदः ॥ शुभदः शुभकर्त्ता च शुभ
नामा शुभः स्वयं ॥ अनर्थितो गुणग्राही अकर्त्ता कनकप्रभः ॥ स्वभावभद्रो मध्यस्थः शा

493 / 1968

चुघ्नो विघ्ननाशनः ॥ शिखंडी कवची शूली जटी मुंडी च कुंडली ॥ अमृत्युः सर्वदृक् सिंहस्तेजोरा
शिर्महामणिः ॥ असंख्येयो प्रमेयात्मा वीर्यवान्वीर्यकोविदः ॥ वेद्यश्चैव वियोगात्मा सप्तावर
मुनीश्वरः ॥ अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ॥ सुरेशः शरणः सर्वः शब्दः प्रतप
तांगतिः ॥ कालपक्षः कालकारी सुकृतिः कृतवासुकी ॥ महेष्वासो महीभर्त्ता निःकलंको विशृं
खलः ॥ द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धसाधनः ॥ निश्चितः संहृतः स्तुत्यो व्यूढोरस्को म
हाभुजः ॥ सर्वयोनिर्निरातंको नरनारायणप्रियः ॥ निर्लेपो निःप्रसंगात्मा निर्व्यंगो व्यंग
नाशनः ॥ स्तव्यः स्तवप्रियः स्तोता व्याप्तमूर्त्तिर्निराकुलः ॥ निरवद्यपदे विद्याराशिरसत्कृतः ॥
प्रशांतबुद्धिरक्षुण्णः संग्रहो नित्यसुंदरः ॥ वैयाघ्रधुर्यो धात्रीशः साकल्यः शर्वरीपतिः ॥ पर
मार्थगुरुर्दृष्टिः सुरेराश्रितवत्सलः ॥ सोमो रसज्ञो रसदः सर्वसत्वावलंबनः ॥ एवं नाम्नां स

हस्रेण तुष्टाव वृषभध्वजः ॥ प्रार्थयामास शंभुं वै पूजयामास शंकरं ॥ परीक्षार्थं हरीशः कम
लेषु महेश्वरः ॥ गोपयामास कमलं तदेकं भुवनेश्वरः ॥ हृदि विचारितं तेन ऊनतो वै कमलं ग
तं ॥ यातु यातु सुखेनैव नेत्रं किं कमलं न हि ॥ ज्ञात्वा तु नेत्रमुद्धृत्य सर्वसत्वावलंबनं पूजया
मास भावेन स्तवेनानेन सर्वथा ॥ मामेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः ॥ ततस्तं भवो
दृष्ट्वा तथाभूतं हरो हरिं ॥ तस्मादवताराश्च मंडलात्पार्थिवस्य सः ॥ यथोक्तरूपिणं शंभुं
तेजोराशिं समुत्थितं ॥ नमस्कृत्य पुरः स्थित्वा स्तुतिं कृत्वा विशेषतः ॥ प्रसन्नवदनो भूत्वा शं
भुश्च संमुखः स्थितः ॥ स्तंभूतं हरिर्दृष्ट्वा कोटिभास्करभूषितं ॥ प्रणामामीश्वरं शंभुं देवं
जनार्दनं ॥ तदा प्राह महादेवं प्रहसन्निव शंकरः ॥ संप्रेक्ष्यमाणया दिव्यं कृतांजलिपुरः
स्थितं ॥ ॥ शंकर उवाच ॥ ॥ ज्ञातं मयेदं सकलं देवकार्यं जनार्दन ॥ सुदर्शनाख्यं चक्रं

415
1968

त्रि॰वि॰
२११

चरद्दासितवक्त्रोऽनेने॥ यद्रूपंनवतादृष्टंसर्वलोकसुखावहं॥ हितायात्रवदेवेशाकृतेनावय
सुव्रत॥ रण॥ शिरेपिसंस्मृत्यदेवानांदुःखनाशनं॥ इदंचक्रमिदंरूपमिदंनामसहस्रकं॥ येश्र
ण्वंतिवैसदा तेषांसिद्धिःस्यादनपायिनी॥ एवमुक्त्वाहरौदेवचक्रंसूर्यायुतसमप्रभं॥ विष्णुर
पिचसंस्नात्वाजप्राहृष्टोहृष्टमुखस्तदा॥ नमस्कृत्यतदादेवंपुनर्वचनमब्रवीत्॥ शृणुदेव
मयाध्येयंपठनीयंचकिंप्रभो॥ दुःखनाशार्थंहिवदत्वंलोकशंकर॥ इतिपृष्टस्तदातेनसं
तुष्टस्तुशिवोब्रवीत्॥ रूपंध्येयंमदीयंचैवसर्वानर्थविनाशनं॥ अनेकदुःखनाशार्थंपठ्यं
नामसहस्रकं॥ धार्यंचक्रंसदाभेद्यसर्वानर्थप्रशांतये॥ अन्येचयेपठिष्यंतिपाठयि
ष्यंतिनित्यशः॥ तस्यदुःखंनस्वप्नेपिजायतेनात्रसंशय॥ राज्ञांचसंकटेप्राप्तेशातादृ
तिंचरेद्यदा॥ संग्रामेचविधियुक्तोचकल्याणंलभतेनरः॥ रोगनाशकरंचैतत्सर्वविद्यानाय

कमुत्तमं॥ येपुंदिव्यफलंयेषांपठिष्यंतिनरास्त्विह॥ लभतेनात्रसंदेहफलंसत्समनुत्तमं॥
ममप्रातःसमुत्थायपूजांकृत्वामदीयकं॥ पठ्यतेममसक्षेत्रेवैसिनित्यंसिद्धिर्नदूरतःऐहिकं
सिद्धिमासाद्यपरलोकसमुद्भवां॥ प्राप्नोतिपावकीनित्यंमत्प्रसादात्सुरेश्वर॥ सायुज्यो
मुक्तिमायातिनात्रकार्यविचारणा॥ एवमुक्त्वातदाविष्णुंशंकरःप्रीतमानसः॥ उपस्थ
तृपकरास्मांहिउवाचशंकरःपुनः॥ वरदोस्मिसुरश्रेष्ठवरान्वृणुयथोप्सितान्॥ तन्नावश्री
कृतोन्नतेस्तवेनानेनतेतदा॥ इत्युक्तोदेवेनदेवंप्रणम्यते॥ यंपिदानींकृपादेवंक्रियतेवान्य
तःपरं॥ कार्यश्चैवविशेषेणकृपालुत्वात्त्वयाप्रभो॥ त्वयिनक्तिर्महादेवप्रसीदवरमुत्तमं॥
नान्यदिच्छामिनक्तानोआत्तर्यिनैवयत्प्रभो॥ तत्श्रुत्वावचनंतस्यदयावान्सुतरांभवः॥
पस्पर्शचितदातस्मिन्श्रद्धोशीतांशुलक्षणःप्राहत्वेनंमहादेवंपरमोनेदमच्युतं॥ भयिन

राम॰
२११

417/1968

शिवस्यं बंधस्य पूज्यश्चैव सुरैरपि॥ विश्वंतर स्त्वदीयं वै नाम पापहरं परं॥ भविष्यति न संदेहो
मत्प्रसादान्मुनीसत्तम॥ इत्युक्त्वांतर्दधे रुद्रो भगवान्नीललोहितः॥ जनार्दनोपि भगवान्स्व
वनाछंकरस्य च॥ प्राप्य चक्रं सुलं ध्यानं स्तोत्रं च भेतन्निरंतरं॥ पपाठ॥ ध्यापयामास भक्तेस्त
दुपपादितं॥ अन्येपि ये पठिष्यंति ते विंदंतु तथा फलं॥ इति पृष्टं समाख्यातं स्तोत्रमेवं तापापहार
कं॥ अतःपरं च किं श्रेष्ठाः कथयामि वचः पुनः॥ ॥ इति श्री शिवपुराणे शिवसहस्रनामनि
रूपणं नाम सप्ततितमोध्यायः॥ ॥ ऋषय ऊचुः॥ ॥ धन्योस्मि कृतकृत्योस्मि जीवितं सफलं
तव॥ वक्तुस्यस्य ऋषिस्यस्य श्रुतं यद्यपि नोगतः॥ १॥ संदेह स्मभवानद्य पृछ्यते हितंभी
प्सुभिः कृत्वालः शिवकृत्येषु तस्मात् पृछामहे वयं॥ केन व्रतेन संतुष्टः शिवो यछति
तत्सुखं॥ यद्दनं तं प्रवक्ष्येतत्त्वं ब्रूहि विशेषतः॥ भुक्तिर्मुक्तिश्च लभ्येत येनैव व्यासशि

ष्यक॥ एतद्वचस्त्वदीयं वै श्रुत्वा वचनमादरे॥ ॥ सूत उवाच॥ ॥ सम्यक् पृष्टं मुनिश्रेष्ठाः कथयामि य
था श्रुतं॥ यथा त्वद्भिः पृछितं तथा पृष्टं हि वेधसा॥ हरिणा च शिवायै व शिवया च तथा पुनः॥ क
स्मिंश्चित्समये तैस्तु पृष्टं च परमात्मने॥ केन व्रतेन संतुष्टो भुक्तिं मुक्तिं च प्रयछति॥ इति पृष्ट
स्तदा तैस्तु यदुक्तं तेन वै तदा॥ तदहं कथयाम्यद्य श्रृणवंतां पापहारकं॥ ॥ शिव उवाच॥ ॥ शृ
णु विष्णो प्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥ वेदानामुपवेदानां स्मृतीनां च तथा पुनः॥ पुराणां च
सर्वेषां धर्माणां देवसत्तम॥ गुह्यानां चैव सर्वेषां सारमेकं समुद्धृतं॥ व्रतिनां चैव सर्वेषां मेतद्दे
वहितं मम॥ ॥ शिव उवाच॥ ॥ भुक्तेश्च प्रापकं ह्येतत् चतुष्टयमुदाहृतं॥ शिवार्चनं रुद्रजप
उपोष्यं च शिवालये॥ वाराणस्यां च मरणं भुक्तिरेषा सनातनी॥ अष्टमी सोमवारश्च कृष्णप
क्षे चतुर्दशी॥ शिवतुष्टिकरं चैतन्नात्र कार्या विचारणा॥ चतुर्थपि बलिष्टं हि शिवरात्रिव्रतं

419
1968

शि.वि. २१३

हरे॥ तस्मात्त्वदेव कर्तव्यं भुक्तिफलेप्सुभिः॥ एतस्माच्च व्रतादन्यत्‌ नास्ति हितत्तरं मम॥ इत्येतद्वच
नं श्रुत्वा हरिराह शिवं प्रति॥ देवदेव महादेव कथयत्वं ममाधुना॥ कथं कार्यं व्रतं चैतत्‌ कस्मि
न्मासेथवा पुनः॥ केनैव विधिना देव कथयत्वं विशेषतः॥ लोकानामुपकाराय पृच्छामि त्वां स
दाशिव॥ कस्मिन्‌ काले तथा कार्या पूजा समाचरेत्‌॥ चतुर्दशी कथं तेद्य वक्तव्या च सदाशिव॥ ए
तत्सर्वं लयादेव कथनीयं हितार्थिने॥ एतच्च वचनं श्रुत्वा शिवो वचनमब्रवीत्‌॥॥ शिव उवाच॥॥ ए
वं व्रतं तु सर्वेषां धर्मसाधनमुत्तमं॥ वर्णानामाश्रमाणां चैव स्त्रीणां च शिशुनां तथा॥ दासानां
दासिकानां च हितं व्रतमुत्तमम्‌॥ दिवानां दानवानां च सर्वेषां च शरीरिणां॥ सकामानां च स
र्वेषां भुक्तिमुक्तिप्रदायकं॥ माघस्यैवासिते पक्षे या कृष्णा च चतुर्दशी॥ निक्षिप्या चैवाहम्रा राम २१३
ह्याहत्याकोटिविनाशिनी॥ तद्दिने चैव यत्कार्यं श्रूयतां कथयामि ते॥ प्रातश्चैव समुच्छाय

आनंदं परमं गतः॥ दुर्लभं मानुषं जन्म असारं चंचलं पुनः॥ सार्थकं च करोम्यद्य व्रतेनानेन वै
पुनः॥ इति निश्चित्य मनसा अन्यान्‌ संप्रेरयेन्नरः॥ शिवरात्रिव्रतं त्वद्य कर्तव्यं हितमीप्सुभि
॥ श्रुत्वं च दंतकाष्ठं च कृष्ण कार्यं नरेण च॥ नद्यादौ स्नानमात्रं हि देशकालाविरोधतः॥ स्वी
यं कर्मप्रकृत्स्यैव कृत्वा नैव समाचरेत्‌॥ शिवस्याग्रे तदा कृत्वा एवं कुरु सुरोत्तमः॥ समर्पि
त शिव यत्कृतं तत्तनंतकं॥ तस्माच्च संनिधिं गच्छेदनंतफलहेतवे॥ पूजां च प्रथमं कु
र्याद्उपचारैर्यथोत्तमं॥ नमस्कृत्य शिवं पश्चात्‌ प्रीति पूर्वं नरोत्तम॥ देवदेव महादेव नी
लकंठ सदाशिव॥ कर्तुमिच्छाम्यहं देव शिवरात्रिव्रतस्य च॥ तव प्रभावाद्देवेशा नीति घ्नोन
भवेति॥ कामाद्याः शत्रवो मां वै पीडां दद्यतु मा पुनः॥ दृष्टालापे च दुःस्वप्नो वासना विविधा पु
नः॥ देवसायं हम्हं देव जलनैव व्रताविधि॥ करिष्यामि च हे देवेश व्रतं तव च सुव्रत॥ एवं

421/1968

शिवि. २१४

नियमसमाप्त्याय पूजाद्रव्यं समाहरेत्॥ सुवर्णं चैव यल्लिंगं प्रसिद्धं चागमेषु वा॥ रात्रौ तत्र स्वयं
गत्वा सेवाद्यं विश्वमुत्तमं॥ शिवस्य पश्चिमे नोगे दक्षिणे वास्य लक्ष्मणे॥ विधाय चैव तत्र
द्रव्याणि ध्यायच्छिवसन्निधौ॥ पुनः स्नायात्तदा तत्र विधिपूर्वेण रोत्तमः॥ योवै व्रती न वेस्स
द्यः कृत्वा स्नानादिकं मुदा॥ परिधाय शुभे वस्त्रे तत्र सिंहासने तथा॥ आचम्य च त्रिवारं हि
पूजारंभे समाचरेत्॥ लिंगपूजां प्रयत्नेन उपचारैः समंत्रकैः॥ अमंत्रकेन कर्तव्यं पूज
नं तु हरस्य च॥ यस्य द्रव्यस्य यो मंत्रस्तेन पूजां समाचरेत्॥ गीतैर्वाद्यैस्तथा नृत्यैर्नक्तिला
वसमन्विते॥ पूजने प्रथमे यामे कृत्वा मंत्रं जपेद्बुधः॥ पार्थिवं च तदा श्रेष्ठं विधाय मे
त्रवान्यदि॥ नित्यं च क्रियते चैतत्पार्थिवं च तदार्चयेत्॥ प्रथमे पार्थिवस्यैव पश्चा
च्च स्थापिते चरेत्॥ पार्थिवं च विधाने हि कर्तव्यं हितमिच्छता॥ स्तोत्रैर्नानाविधैर्देवतो राम. २१५

षयेत् वृषभध्वजं॥ माहात्म्यं व्रतसंभूतं श्रोतव्यं व्रतकारणं॥ चतुर्ष्वपि च यामेषु मंत्राणां च चतुष्ट
यं॥ कृत्वावाहनपूर्वं वै विसर्जनावधिक्रमात्॥ जागरेण तदा कृत्वा महोत्सवसमन्विते॥ प्रा
तःकाले पुनस्तत्र स्थापितं पूजयेच्छिवं॥ पुनः स्नात्वा शिवस्यैव नियमं च विमोचयेत्॥ निय
मोद्यमया देव कृतस्त्वेव तवाज्ञया॥ विसर्ज्येनं मया स्वामिन् जातं व्रतमुत्तमं॥ व्रतेनानेन दे
वेश यथाशक्तिकृतेन च॥ संतुष्टो नव त्राव्यरव्य कृपां कुरु ममोपरि॥ पुष्पांजलिं शिवे दत्वा
नियमं च विसृज्य च॥ नमस्कृत्य शिवायैव दत्वा दानं यथाविधि॥ संकल्प्य च ततः॥ कृत्वा जलं
गृह्य ततः परं॥ यामे यामे च या पूजा तां चैव कथयाम्यहं॥ प्रथमे चैव यामे तु स्थापितं पार्थि
वं मुने॥ पूजयेत् परया भक्त्या उपचारैरनेकशः॥ प्रयोगादि विधायैव कामनां विनियुज्य
च॥ यं च द्रव्येश्च प्रथमे पूजनीयो हि नः सदा॥ दुग्धं दधि मधु सर्पिः शर्करा क्रमेण च॥

423/1968

तस्यतस्यचमंत्रेणतत्रद्रव्यंसमर्पयेत्॥तद्द्रव्यंतुसमर्प्यैवजलधारांप्रदापयेत्॥पश्चाज्जलधारां
प्रदापयेत्शिरस्याणुनाम्यवैनेपुः॥शतमष्टोत्तरंमंत्रंपठित्वाजलधारया॥पूजयेच्चशिवंतत्रनि
र्गुणंगुणरूपिणः॥गुरुदत्तेनमंत्रेणपूजयेद्वृषभध्वजं॥अन्यथानाममंत्रेणपूज्यश्चायंसदा
शिवः॥चंदनेनविचित्रेणतंडुलैश्चाप्यखंडितैः॥ततश्चैवतिलैःपूजाकार्यातस्यमहात्मनः॥
पुष्पैश्चशतपत्रैश्चकणवीरैस्तथापुनः॥अष्टभिर्नाममंत्रैश्चपुष्पाण्यारोपयेच्छिवे॥भवः
शर्वस्तथारुद्रःपुनःपशुपतिस्तथा॥उग्रश्चैवततःप्रोक्तोमहान्प्रोक्तस्ततःपरं॥भीमश्चैव
तथेशानःश्रीपदंपूर्ववत्तदा॥चतुर्थ्यंतपदेनैवपूजयेत्पंचवक्त्रकं॥पश्चाद्धूपंचदीपं रात्र.
चनैवेद्यंततःपरं॥प्रथमेचैवनैवेद्यंपक्वान्नंकारयेत्तदा॥अर्घंचश्रीफलंदत्त्वातांबूलंचनि २१५
वेदयेत्॥नमस्कारंततोध्यानंजपःप्रोक्तस्ततःपरं॥गुरूपदिष्टमंत्रेणतोषयेत्परमेश्वरं॥स्तु

त्वाजपंततःपश्चाद्धेनुमुद्रांप्रदर्शयेत्॥पश्चाद्धतर्पणंतत्रब्राह्मणान्पंचशक्तितः॥एकस्त्वावरपक
ःप्रोक्तःपतिरेकस्ततःपुनः॥संकल्पंचतथाकृत्वागीतवाद्यंतथापुनः॥नृत्यंचैवतथाचात्रगानेचवि
विधंतदा॥कर्तव्यंयामसमात्रेतुयावद्यामेनवेदिह॥तत्रपूजाफलंतस्मैनिवेद्यपरमात्मने॥नम
स्कारंततःकृत्वासंकल्पंसंविधायच॥पुनश्चद्वितीयेयामेविसर्जयन्यासमाचरेत्॥अथवैकस्मि
न्रूपेणपार्थिवंद्वितीयेपुनःऊर्ध्वस्वांतथाविदिमोर्मुक्तिफलाप्तये॥द्रव्यैःपूर्ववत्तथापूजांकृत्वाध्य
र्घंसमर्पयेत्॥पूर्ववत्तोद्विगुणंमंत्रमुच्चार्यपूजयेच्छिवं॥चंदनेनततःपूजांतुदलैःपूजनंपुनः
॥यवैश्चैवततःपूजाकर्तव्याशंकरस्य॥पुष्पैश्चैवप्रकर्तव्याकमलैःपूजयेच्छिवं॥बिल्वपत्रैस्तथा
वाचाकर्तव्यंपूजनंशिवे॥एवंकृतेष्टतेयेनतज्जन्मसफलंभवेत्॥भुक्तिंरत्वाथमुक्तिंचयच्छास्य
त्रनसंशयः॥इतिश्रीवचनंनिशम्यविधुर्हितरतमद्भुतव्रतमाजगाम॥धर्मतरवनुव्रतमनु

425/1968

त्तमंविष्णुव्यारतसर्वाहितेषुएतद्देवकहाचिन्तारद्दायेवकथयामासवैहरिः॥॥विष्णुरुवाच
॥॥अर्घंचबीजपूरेणकुर्याद्यामेद्वितीयके॥यथापूर्वंयथापूर्वंकथितंतत्तथैवहि॥धूपंदी
पंचनैवेद्यंपायसान्नंप्रकल्पयेत्॥दत्वातांबूलकंतत्रदक्षिणांचसमर्पयेत्॥ध्यानंचैव
पुनस्तत्रकृत्वाजाप्यंततःपुनः॥मंत्रावर्त्तितुद्विगुणंपूर्वतोपिजनार्दनः॥ततश्चब्राह्मण
नांहिभोज्यंसंकल्प्यसमाचरेत्॥पूर्वंचैवनमस्कारंगीतंनृत्यंतथापुनः॥कुर्याद्दानंरसंपु
नःयावच्चद्वितीयावधि॥यामेचैवद्वितीयेजातेतृतीयेचसमागते॥विसर्ज्यचशिवंतत्रपु
नर्मूर्तिंप्रकल्पयेत्॥स्थापितेवाततःकुर्यात्पुनःपूजाविधिंहरेः॥द्रव्यैःपूजांपुराकृत्वा
पश्चाद्धारांप्रदापयेत्॥पूर्वतोद्विगुणंकुर्यात्मंत्रेणविधिपूर्वकं॥ततश्चचंदनेनैवसंपू
ज्यंतंडुलैस्तथा॥गोधूमैःपूजनंकुर्यात्शिवप्रीणनतत्परः॥पुष्पैश्चैवार्घ्यसंयुतैःपूर्वोक्तै

र्मंत्रसत्तमैः॥धूपैश्चविविधैस्तत्रदीपैर्नानाविधैरपि॥नैवेद्यंपूपकैस्तत्रशाकैर्नानाविधैर
पि॥कृत्वाचैवाथकर्पूरैरारात्रिकविधिंचरेत्॥अर्घंचदाडिमेनैवदद्याच्छंकरायच॥नमस्का
रंततोनेध्यानंकृत्वामंत्रंजपेत्ततः॥ततोपिद्विगुणंजाप्यंकृत्वाचब्रह्मभोजनं॥संकल्पितेदक्षिणां
दत्वागीतंतथानृत्यंकृत्वायामावधिर्भवेत्॥यामेतृतीयेजातेचचतुर्थेनसमागते॥विसर्ज्यच
पुनःपूजांकृत्वाचपार्थिवीहरेः॥प्रयोगादिपुनःकृत्वापूजाविधिसमाचरेत्॥द्रव्यैश्चपूजनं
कृत्वाजलधारांप्रदापयेत्॥पूर्वतोद्विगुणेनैवमंत्रजाप्येनवापुनः॥चंदनाद्यवसंभूतांपूजां
चतंडुलैःस्तथा॥माषैश्चैवाथमुद्गैश्चप्रियंगुभिश्चवापुनः॥अथवासप्तधान्यैश्चपूजयेत्प
रमेश्वरं॥पुष्पैश्चप्रथमेपूज्यजातीजैःप्रतीयामकं॥कह्लारैकणवीरैश्चद्रोखपुष्पैस्तथा
पुनः॥चंपकैर्वाविधानंचरुद्रस्यहितामिच्छया॥पूर्वोक्तैर्मंत्रवर्यैश्चनामभिर्वाविशेषतः॥

427
1968

शिवि. २१७

संपूज्य शंकरं देवं धूपं दीपक्रमेण च॥ नैवेद्यं तत्र दद्याद्वै माधुर्यैर्विविधैरपि॥ अथवान्नैर्वमाषान्नै
स्तोषयेच्च सदा शिवं॥ अर्घं दद्यात्कदल्याश्च फलेनैवाथवा हरेः॥ विविधैश्च फलैस्तत्र दद्याद्वै धंशि
वाय च॥ नमस्कारं ततो ध्यानं कृत्वा जाप्यं समाचरेत्॥ पूर्वतो दिग्मुखस्तत्र कुर्याज्जाप्यं नरोत्तम
॥नमस्कारं ततश्चैव संकल्पपूर्वकं तथा॥ गीतं वाद्यं पुनश्चैव यावत्स्यादरुणोदयः॥ उदये च कृत
था जाते संप्राप्य शंकरं पुनः॥ स्नात्वा पूज्य ज्ञां पुनः कृत्वा तु पुष्पाक्षतैरपि॥ नानाधूपार्घनैवेद्यै
रन्निघोषो यथा भवेत्॥ सर्वभावेन तं पूज्य तोषयेच्छंकरं मुदा॥ नानाविधानि दानानि भोज्यं च विवि
धं तदा॥ ब्राह्मणानां यतीनां च कर्तव्यं प्रहरसंख्यया॥ शंकराय नमस्कृत्य स्तुतिं नानाविधां तदा रात्र.
॥पुष्पांजलिं तदा तत्र मंत्रैरेतैः सुरोत्तम॥ दद्यात्स हितार्थाय शिवाय परमात्मने॥ तावकस्त्व २१७
द्गतप्राणस्त्वच्चित्तोऽहं सदा नृप॥ कृपानिधइति ज्ञात्वा यथायोग्यं यथा कुरु॥ अज्ञानाद्यदि वा ज्ञा

नाज्जपपूजादिकं मया॥ कृपानिधइति ज्ञात्वा भूतनाथ प्रसीद मे॥ अनेनैवोपवासेन यज्जातं फलमे
व॥ चतेनैव प्रीयतां देवः शंकरः सुखदायकः॥ अनेनैव च पुष्पाणामंजलीनां प्रतोमम॥ न्यूनं सं
पूर्णतां यातु व्रतेचैव महेश्वरः॥ पुष्पांजलिं समर्प्येवं तिलकं शिषमेव च॥ गृह्णीयात्त्र ब्राह्म
णेभ्यश्च कृत्वा तान्नु शंकराय॥ च॥ विसर्जयेच्छिवं पश्चात्पुनरागमनाय च॥ ममकुले सदा दे
वम्नजनतेस्तु सर्वदा॥ मानसान्मम देवेश दूरं नैव कदाचन॥ अहर्निशं क्षणं चापि विना च
स्मरणं तव॥ स्वसनं तेस्तु सर्वदा॥ मानसान्मम देवेश दूरं नैव कदाचन॥ अहर्निशं क्षणं
चापि विना च स्मरणं तव॥ स्वसनं न भवेद्देव तदास्तु कृपया मे वच॥ इत्येवं वचनमं स्कृत्य विस
र्ज्य शंकरं मुदा॥ जजनोजयं तदा कृत्वा सर्वपापक्षयो भवेत्॥ एवं व्रतं कृतं येन तस्मात्
दूरे हरोहनं॥ फलं वक्तुं न शक्नोति तन्नारद्यं विधते मम॥ अनायासतया चेद्वैकृतं व्रतंतु

429/1968

त्तमं॥ तस्यैमुक्तिबीजं च जातं नात्र विचारणा॥ व्रतमेतत्प्रतिमासे कर्तव्यमृषिसत्तमाः॥ उद्याप
नविधिं पश्चात्कृत्वा सांगं फलं लभेत्॥ व्रतस्य करणात्सूतेन शंकरः सर्वदुःखहा भुक्तिं मुक्तिं च
दत्वा च रतेनात्र संशयः॥ इति व्रतफलं श्रुत्वा देवा विष्णुमुखास्तदा॥ आनंदं परमं प्राप्य स्वं स्वं
धाम ययुस्तदा॥ इति श्रीशिवपुराणे शिवरात्रिव्रतमहिमानिरूपणं नाम एकसप्ततितमो
ऽध्यायः॥ ॥ऋषय ऊचुः॥ ॥उद्यापनविधिं ब्रूहि शिवरात्रिव्रतस्य हे॥ यत्कृत्वा शंक
रः साक्षात्प्रसन्नो भवति ध्रुवं॥१॥ इति तेषां वचः श्रुत्वा सूतो वचनमाददे॥ ॥सूत उवा
च॥ ॥श्रूयतां ऋषयः श्रेष्ठा विधिं वक्ष्ये यथाश्रुतं॥ शिवरात्रिदिने प्राप्ते नित्यं संपाद्य वै तदा॥
शिवालयं ततो गत्वा पूजां कृत्वा यथाविधि॥ गृह्णीयान्नियमं तत्र व्रतस्य विधिवन्नरः॥ रात्रौ
जागरणं कर्यात्कृत्वा पूजां यामचतुष्टये॥ लिंगे च पार्थिवे वापि कृत्वा च विधिपूर्वकं॥ प्रातःकाले

समुत्थाय संकल्प्य शिवसंन्निधौ॥ कुर्याच्छिव प्रसादाच्च करिष्ये व्रतमुत्तमम्॥ प्रतिमासे चैकैकेत
प्तत्तव्यमयादेव त्वदाज्ञया॥ निर्विघ्नेन व्रतं चैतत्पूर्यतां कृपया तव॥ इति नियमं शिवस्याग्रे कृत्वा
उन्नोज्यादिकं चरेत्॥ एवंविधा वर्षमेकं कुर्याद्विधिन्नरः॥ विप्राञ्शिषं ततो गृह्य नियमं परिसमा
प्य च॥ पश्चाच्चतुर्दशीं प्राप्य कृष्णपक्षसमुद्भवां॥ प्रातःकाले समुत्थाय तीर्थादौ वा गृहे पुनः॥ स्ना
नादि सर्वं नित्यं च समाप्य नियमं चरेत्॥ शिवस्य संनिधिं गत्वा पूजां कृत्वा यथाविधिं॥ अद्यव्र
तमयादेव कर्तव्यं च तवाज्ञया॥ निराहारतया देव निर्जलं विधिवत्प्रभो॥ कर्तुमिच्छाम्यहं देव द
धैर्यं रक्षस्व मे प्रभो॥ नमस्कृत्य तदा शंभुं कामक्रोधविवर्जितं॥ दिनं नीत्वा तथा रात्रौ पूजां यामस
समुद्भवां॥ कृत्वा जागरणं तत्र प्रातःकालावधि स्वयं॥ जपमंत्रवरेणैव गीतं नृत्यं तथा पुनः॥ कृ
त्वा पुनस्तदा स्नात्वा पूजां चैव शिवस्य च॥ विधाय ब्राह्मणान्पंच भोजयेन्न्यासिनं तदा॥ प्रत्येके

431
1968

शि॰वि॰
२१९९

कंतदा भोज्यं ततः अपाहि सपरं॥ तदा त्रिषंत दागत्य नानाकार्यं समाचरेत्॥ एवं च प्रति मासं च कृ
त्वा व्रतमनुत्तमं॥ यावच्छिवरात्रिर्वै पुनरायाति वै सर्जन तस्मिन् दिने स्वयं कार्यं मुद्यापनविधिं चरेत्॥ ब्राह्मणांश्च तदा द्वादश शास्त्रा रोपरि शोध्य च॥ कर्तव्यं च तत्रैव सर्वथा कारयेत् ध्रुवम्॥ तदहं कथयाम्यद्य विधानं विधिपूर्वकं॥ उद्यापदिनेनैव कर्तव्यं श्रूयतां शुभाः॥ प्रातर्नित्यं च संपाद्य मंडलं तत्र कारयेत्॥ गौरी तिलकनाम्ना वै प्रसिद्धं भुवनत्रये॥ कुंभास्तत्र प्रकर्तव्या प्राजापत्यविसंज्ञया॥ सवस्त्राः सफलास्तत्र दक्षिणा सहिताः शुभाः॥ मंडलस्य च पार्श्वे वै मोऽस्यापनीया चनीयाः प्रयत्नतः॥ मध्ये चैकश्च संस्थाप्यस्तत्रोमो सहितः शिवः॥ दीपश्च दक्षिणे भागे कृत्वा रात्रौ प्रपूजयेत्॥ जागरणं च तदा कृत्वा पूजां यामोद्भवां नरः॥ रात्रिमाक्रामयेत्तत्र नृत्यगीता दिना व्रती॥ संपूज्य विधिवद्देवं संतोष्य प्रातरेव च॥ पुनः

राम॰
२१९९

पूजां तदा कृत्वा ब्राह्मणान् भोजयेत् ध्रुवं दानानि च विचित्राणि कुर्यात्तत्र शिवाज्ञया॥ यथाशक्ति विधानं च प्राजापत्यविधिं चरेत्॥ ब्राह्मणान् भोजयित्वा तु शिवाय फलमर्पयेत्॥ देवदेव महादेव शंभो शंकर वै हर॥ व्रतेनानेन देवेश कृपां कुरु ममोपरि॥ मम श्रद्धानुसारेण व्रतमेतत्कृतं शिव॥ अज्ञानाद्यदि वा ज्ञानात् जपपूजादिकं मया॥ कृतं तदस्तु सफलं कृपया तव शंकर॥ एवं पुष्पांजलिं दत्वा शिवाय परमात्मने॥ नमस्कारं ततः कृत्वा प्रार्थना पुनरेव च॥ चरणौ चलयोर्योमे चित्तात् दूरं न कर्हिचित्॥ एवं व्रतं कृतं येन नश्यंनं तस्य न किंचन॥ मनेप्सितांश्च सिद्धिं च जना तेनात्र सं शाय॥ यथा तथा व्रतं ह्येतत् मुक्तिबीजं प्रशस्यते॥ अज्ञानात् ज्ञानतो वापि व्रतेन तुष्यते शिवः॥ ॥ इति श्री शिवपुराणे शिवरात्रि व्रतविधिनिरूपणो नाम द्विसप्ततितमोऽध्यायः॥ ॥७२॥ ॥
ऋषय ऊचुः॥ ॥ सूतस्य वचनं श्रुत्वा आनंदं परमं गताः॥ प्रभावश्च व्रतस्यास्य कृतो विस्तरात्

435/1468

पुनः॥११॥ कथयत्वं महाबाहो केनेह फलमुत्तमं॥ अज्ञानतश्च कृत्वा हि प्राप्तं किंच वदाधुना॥१२॥
॥सूत उवाच॥ ॥श्रूयतामृषयः श्रेष्ठाः कथयामि पुरातनं॥ इतिहासं निषादस्य सर्वपापप्रणाशनं
॥पुरा कश्चिद्वने भिल्ल आसीन्नाम्ना गुरुद्रुहः॥ कुटुंबी बलवान् क्रूरः सर्वकर्मपरायणः॥ निरं
तरं वने गत्वा मृगान् हन्याद् अनेकशः॥ चौर्यं च विविधं तत्र करोति स वनेचरः॥ बाल्यादारभ्य
तेनेह न किंचिन्नश्शुभं कृतम्॥ महान् कालो व्यतीतो हि वने तस्य दुरात्मनः॥ कदाचिच्छिवरा
त्रिश्चैवासीत्तत्र सुशोभना॥ न दुरात्मा स जानाति महद्व्रतमनुत्तमम्॥ एतस्मिंश्च दि
ने भिल्लो मात्रा पित्रा स्त्रियाश्चना॥ प्रार्थितः क्षुधयाविष्टैर्भक्ष्यं देहि वनेचर॥ इति संप्रार्थितः
सोऽपि धनुरादाय सत्वरं॥ जगाम मृगहिंसार्थं बभ्राम सकले वने॥ दैवयोगात्तदा तेन न प्रा
प्तं किंचिदेव हि॥ अस्तं प्राप्तस्तदा सूर्यः स वै दुःखमुपागतः॥ किं कर्तव्यं क्व गंतव्यं न प्राप्तं वे

तं ने मया॥ बालश्च मे गृहे यो वै पित्रोश्च किं भविष्यति॥ मदीयं च कलत्रं च तस्य किं तु भविष्यति॥ किं
चित् गृहीत्वा च मया गंतव्यं न तथा परं॥ इत्थं विचार्य तत्रैव जलाशयसमीपगः॥ जलावतरणं
यत्र गत्वा स्वयं स्थितः॥ अवश्यमत्र कश्चिद्वै जीवश्चैवागमिष्यति॥ इति मत्वा तदा वृक्षमेतं बि
ल्वेति संज्ञितं॥ समारुह्य स्थितस्तत्र जलमादाय वै तदा॥ रात्रौ तत्र तदा स्थित्वा दृष्टिं बध्वा तु सत्व
के॥ कदा यास्यति कश्चिद्वै कदा हन्म्याम्यहं पुनः॥ इति बुद्धिं समास्थाय स्थितोऽसौ क्षुधया पुनः॥ दि
वसे चोपवासेनैव न प्राप्तं वेतनेयदा॥ प्रथमे चैव यामे च मृगी चैका समागता॥ तृषार्ता चकिता
चैव उत्प्लुत्यं कुर्वती तदा॥ तां दृष्ट्वा च तदा तेन शरो धनुषि संदधे॥ तस्यैवं कुर्वतस्तत्र जलं बिल्वी
दलानि च॥ पतितानि ह्यधस्तत्र शिवलिंगमभूत्तबुधाः॥ यामस्य प्रथमस्यैव पूजा जाता शिव
स्य च॥ अन्महिम्ना च तस्यैव पातकं ज्वलितं तदा॥ तत्रत्यं चैव तच्छब्दं तु श्रुत्वा सा हरिणी भि

487/1968

या॥ व्याकुला व्याधकं दृष्ट्वा बाणेन च त्तविष्यति॥ किं करोमि क्व गच्छामि उपायः स्व यास्य हे॥ इति
विचार्य सा तत्र वचनं चेदमब्रवीत्॥ मृग्युवाच॥ किं कर्तुमिच्छसि व्याध श्रुत्वा व्याधो ब्रवीदि
दं॥ व्याध उवाच॥ कुटुंबं क्षुधितं मे ग्रह त्वां तर्पयाम्यहं॥ दारुणं तद्वचः श्रुत्वा दुर्दरं तं
वनेचरं॥ तत् श्रुत्वा सा मृगी रुष्ट धन्याहं व्याध सत्तम॥ मृगी उवाच॥ मन्मांसेन तु सुखं स्या
द्देहस्यानर्थकारिणः॥ उपकारकरस्यैव तत्पुण्यं जायते त्विह॥ तत्पुण्यं शक्यते नैव व
क्तुं वर्षशतैरपि॥ असारस्य शरीरस्य साफल्यं मे भविष्यति॥ परं तु शिशवो मेद्य वर्तते ह्याश्रमे
मम॥ भगिनीं च समर्प्यैव स्वामिने विधिवत्तदा॥ आयास्ये च पुनर्मासात् हृष्टिस्ते सर्वथाश्रुता॥ राम.
इत्युक्तोपि तदा व्याधो न मेने वचनं ततः॥ व्याध उवाच॥ संकटे समनुप्राप्ते सर्वे मिथ्याभिभा २२१
सिनः॥ इत्येवं वचनं श्रुत्वा मृगयोर्वचनं पुनः॥ सत्येन सर्वथा देवी सत्येनैव समुद्रकः॥ सत्ये

न जलधाराश्च सर्वं सत्ये प्रतिष्ठितं॥ न मे मिथ्या वचस्त्वं हि जानीहि सर्वथा च॥ २॥ इत्युक्तोपि न मेने तत्
वचनं पुनरब्रवीत्॥ शृणु व्याध प्रवक्ष्यामि पापं मे शिरसो नवेत्॥ यद्यहं नागमे ह्यत्र एतेषां पातं
कं मम॥ ब्राह्मणो वेदविक्रेता संध्याहीनस्त्रिकालकं॥ स्त्रियद्य स्वामिनोप्याज्ञां समुल्लंघ्य गच्छय
त॥ कृतघ्ने नैव यत्पापं कथापां वि मुखे हरेः॥ हि द्रोणपिच यत् पापं द्रोहे वै वतुधने॥ तेन पापेन लि
प्ता भियद्यहं नागमे पुनः॥ इत्यादि निश्चने कान्मि मृगीकृत्वा स्थिता तदा॥ व्याधकोपि स्वयं तत्र ग
च्छ शीघ्रं वचो ब्रवीत्॥ मृगी रुष्ट जलं पीत्वा गता चाश्रममंडलम्॥ तावत्तु प्रथमो याम्यो गतो निप्रा
विनाशुना॥ तदीया भगिनी या वै मृगी च परिभाषिता॥ तस्या मार्गं वितत्वती आजगाम जलार्थिनी 439/1968
तां दृष्ट्वा तु स्वयं भिल्लो दृष्ट्वा बाणस्य कर्षणं॥ पूर्ववज्जलपत्राणि पतितानि शिवोपरि॥ यामस्य द्वि
तीयस्यैव पूजा तेजा महात्मनः॥ सा मृग्यपि च तं दृष्ट्वा किं करोषि वनेचर॥ पूर्ववत्कथितं तेन

शि॰ वि॰ २२२ श्रुत्वा तुष्टिसमन्विता ॥ धन्याहं श्रूयतां श्रेष्ठ सफलं देहधारणं ॥ अनित्येन शरीरेण ह्युपकारो
भविष्यति ॥ परं तु मम बालश्च गृहे तिष्ठति चार्भकः ॥ तेभ्यस्तान् वै समर्प्यैव आगमिष्याम्य
हं ध्रुवं ॥ तेनोक्तं न च मन्येऽहं हन्यामिति न संशयः ॥ शृणु व्याध प्रवक्ष्यामि यद्यहं नागमे पुनः ॥
एतेषां पातकं मे स्यान्न वदामीति न संशयः ॥ वाचा विचलिता यस्य सुकृतं तेन हारितं ॥ मेदिनी
सत्यपात्रेण क्षिरेत्या तिष्ठति ध्रुवं ॥ परिणीतां स्त्रियं हित्वा अन्यां गच्छति यः पुमान् ॥ तत्पापं
मे ध्रुवं शिरसि यद्यहं नागमे पुनः ॥ वेदधर्मान् समुल्लंघ्य कल्पितेन पथा ॥ व्रजेत् ॥ विष्णुभक्ति
समायुक्तः शिवनिंदां करोति यः ॥ पित्रोः क्षयाहमासाद्य श्राद्धं यश्चैव नाचरेत् ॥ दत्त्वा च परि
हृतां पश्चात् करोति वचनं पुनः ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ इत्युक्तश्च तदा व्याधो राम॰ २२२
गच्छ त्वं पुनरागमे सा मृगी च जलं पीत्वा हृष्टा सा च स्वमाश्रमे ॥ जगाम तावच्च मृगो धर्मज्ञो लिं

तयन् गतः ॥ तावद् द्वितीया या मृगी तान्निरीक्ष्य विना श्रमा ॥ मृगोपि च मृगीं पश्यन् जलमार्गे समा
गतः ॥ पुष्टं मृगं च दृष्ट्वा स रुष्टो वने चरस्तदा ॥ बभूमीसं च विद्धं तत्तत्र स्यादनपायिनी ॥ म
त्वा च बाणं मार्कण्डप्रयत्नं कृतवान् यदा ॥ तदा च जलयुक्तानि पत्राणि च शिवोपरि ॥ तेनैव तत्
तीयस्यैव यामस्य रूपि सत्तमाः ॥ पूजा जाता शिवस्यैव कृपालुत्वं च पश्यत ॥ तदीयं वै वृत्तं त्रा
ह्यं किं करोषि मृगोऽब्रवीत् ॥ क्रूरं वा वर्धितं च तं हन्यां धीरेपि वचनं पुनः ॥ तत् श्रुत्वा हरिणः सोऽपि
हृष्टो वचनमब्रवीत् ॥ धन्योहं पुष्टिवानद्य अन्नतृप्तिर्न वा यतः ॥ यस्यांगेनोपकारार्थं गतं तेन चे
व परमागतः ॥ तस्य पूर्वं तत्त्व मर्थं नात्र कार्या विचारणा ॥ सम्यक् जातं शरीरेण तत्पश्चिवेश्चन
विष्यति ॥ परं तु बालकाश्चास मर्प्य जननी पुनः ॥ आश्वास्याथ च तान् सर्वानागमिष्याम्य
हं ध्रुवम् ॥ इत्युक्तो वै पुनस्तत्र व्याधो वचनमब्रवीत् ॥ ये ये समागता अत्र ते ते सर्वे त्वयोक्ता म

441/1968

शिवि॰ २२३

॥कश्चिद्भ्रातुगतास्तेवैनायांत्यद्यापिवंचिता॥त्वंचापिसंकटेउत्काव्यलीकंचगमिष्यसि॥ममै
वजीवनंचाद्यन्नविष्यतिकथंमृग॥इत्येवंवचनंश्रुत्वामृगोवाक्यमुपाददे॥शृणुव्याधप्रव
क्ष्यामिनानृतंविद्यतेमयिसत्येनसर्वंब्रह्मांडंतिष्ठत्येवचराचरं॥यस्यवाणीव्यलीकाहितत्
पुण्यंज्वलितंक्षणात्॥तथापिमन्यतेनैवसांप्रतंमृगमिष्टक॥संध्यायांभोजनेनैवबशिव
वरात्रिव्रतेकृते॥कूटसाक्ष्येन्यासहारिसंध्याहीनेद्विजेथवा॥शिवहीनेमुखेयस्यनोपका
रःक्षमोपिसत्॥दिवामैथुनकारीचतस्यैवपातकंचयत्॥पर्वणिश्रीकलादौचव्रतस्यैवदि
नेथवा॥अन्नस्यकारकेयच्चतत्पापंशिरसोमम॥यद्यहंनागमेदत्रवंचयित्वाचत्वांपु
नः॥तदेतिवचःश्रुत्वागच्छशीघ्रंसमाव्रज॥व्याधकेनैवमुक्तस्तुजलंसंपीत्वागतोमृग
॥तेसर्वेमिलितास्तत्रआत्मेक्षषिसत्तमाः॥हृत्नातेचैवतत्रैवपरस्परं॥गतश्चनिश्चये

राम॰ २२३

नैवसत्यपाशेनयंत्रिताः॥आश्वास्यबालकांस्तत्रगंतुमुत्कंवितास्तदा॥मृगीचिंतयातत्रस्वामिनंवा
क्यमब्रवीत्॥अनाथाबालकाअत्रकथंस्थास्यंतिवैमृग॥प्रथमेचमयातत्रप्रतिज्ञाचकृताप्मम॥
तस्मान्मयाचगंतव्यंनवस्थास्यतेविह॥इत्येवंचस्तदाश्रुत्वाकनिष्ठवाक्यमब्रवीत्॥अहंचसे
वकीवाचगच्छामीस्थीयतांत्वया॥मृगोपिवचनंश्रुत्वागम्यतेचमयापुनः॥इतिश्रुत्वावचस्तस्यैवे
धव्यंजीवितेहिधिक्॥बालानाश्वास्यतांस्तत्रसमर्प्यसहवासिनः॥गतास्तेसर्वएवात्रयत्रास्ते
व्याधसत्तमः॥प्रतीक्षांक्रियमाणश्चमार्गंचैवनिरीक्षयन्॥तावत्तान्वीक्ष्यतेसर्वेसत्यपाशसु
यंत्रिताः॥तान्दृष्ट्वाहर्षितोव्याधोबाणंधनुषिवादधे॥तेबालाअपितेसर्वेपित्रोरनुसमा
गताः॥एतेषांयागतिःस्यान्मेअस्माकंसाभवेत्तदा॥पुनश्चजलपत्राणिपातितानिशिवो
परि॥ततोजाताचतुर्थस्यप्रजायामस्यप्रजायामस्यैवैश्रुभाः॥तस्यपापंतदासर्वंतस्मात्

443
1968

भवत्क्षणात् ॥ मृगीमृगीमृगाश्चैववत्सौघंचव्याधसत्तम ॥ अस्माकंसार्थकंदेहं कुरुत्वंव्याध
सत्तम ॥ इतितेषांवचःश्रुत्वाव्याधोविस्मितोपरि ॥ तेनज्ञस्मयमागतः ॥ शिवजोपूप्रभावेन
ज्ञानेतस्यसमागतं ॥ धन्याएतेमृगाश्चैवज्ञानहीनासुसंमताः ॥ स्वीयेनैवशरीरेणपरोप
करणेरताः ॥ मानुष्यंजन्मसंप्राप्यसाधितंकिंमयाधुना ॥ परकार्यंचसंपीड्यशरीरंपोषितं
मया ॥ कुटुंबंपोषितंमेद्यपूर्वंचबहुपीडनैः ॥ कृत्वाचपोषितंसर्वंहागतिर्मेत्रविपत्ति ॥ कां
वागतिंगमिष्यामिपातकंजन्मतःकृतं ॥ इतिदानींचिंतयाम्यधिधिक्कारोजीवनेमम ॥ इति
ज्ञानसमापन्नोबाणंसंचारयन्तदा ॥ गम्यतांचमृगश्रेष्ठाधन्यास्थइतिचाब्रवीत् ॥ इत्युक्तेच
तदातेनप्रसन्नःशंकरस्तदा ॥ पूजितश्चस्वरूपंहिदर्शयामाससंमतं ॥ पंचवक्त्रादिकंय
च्चतद्रूपंरूपयात्तदा ॥ दर्शयित्वावरंब्रूहिप्रसन्नोस्मिव्रतेनच ॥ व्याधोपिशिवरूपंचजीव

न्मुक्तोभवत्क्षणात् ॥ पपातशिवपादाग्रेसर्वंप्राप्तंमयाधुना ॥ शिवोपिचगुहंनामस्थापयित्वा
परंह्यदात् ॥ शृणुव्याधइदानींचमुक्तिंभुंक्ष्वमनेप्सितं ॥ राजधानींचसंभुज्यवेशाह्विस्तरा
श्रुभा ॥ अनपायिनीभवेन्नित्यंश्लाघिनीदेवतेरामसत्वव्याधसमायास्यसिसंशयं ॥ तत्पू
जांतस्यमुक्तिंचकर्तव्यास्यत्यसंशयं ॥ मुक्तिंसर्वजनैःसद्भिइच्छन्तीमुनिसत्तमैः ॥ म
मपूजारतास्तेचवेदपासुबलवत्तराः ॥ एतस्मिन्नंतरेतेतुशिवस्यदर्शनंकृतं ॥ सर्वेते
चतदामुक्तिंमृगयोनेःप्रापिदिरे ॥ विमानेचसमारुह्यदिव्यपोनिगतीस्तदा ॥ शिवदर्शन
मात्रेणशापान्मुक्तादिवंगताः ॥ व्याधेश्वरःशिवोजातःपर्वतेह्यर्बुदाचले ॥ व्याधोपितद्दिना
तन्नंमुक्तिंचसुरसत्तम ॥ मुक्ताराम कृपांप्राप्यशिवसायुज्यमाप्नुयात् ॥ अज्ञात्वाचव्रतंह्ये
तत्कृत्वासायुज्यमाप्नुयात् ॥ किंपुनर्भक्तिसंपन्नायेतितन्मयतांगताः ॥ विचार्यसर्वशा

445
1968

त्रि॰वि॰ २२५

ख्योस्मिंश्च मेरुश्चैवाप्यनेकशः॥ व्रतानि विविधान्यत्र तीर्थानि विविधान्यथा॥ दानानि च विविधानि हि
तमिमुनिः॥ एतत्सर्वं समाख्यातं पुनश्च कथयाम्यहं॥ इतिहासमृषिश्रेष्ठा व्रतं पापहरं परं
॥॥सूत उवाच॥ ॥अवंतीनगरे रम्ये दीक्षितो ऋषिर्वै राज॥ सुकुलीनः सदाचारः शुभ
कर्मपरायणः॥ वेदेषु चैव शास्त्रेषु परिस्नातो विचक्षणः॥ तस्य भार्या किलीनासीत्प
तिधर्मपरायणा॥ स्मृताध्यपाठयामास भक्तिभावसमन्वितः॥ राज्ञो मान्यमतीवासी
त्प्राप्यते धनमुत्तमं॥ तस्य पुत्रद्वयं चासीत्सुनिधिर्वेदनिधिस्तथा॥ ज्येष्ठश्च सुनिधिर्यो
वै पितृधर्मपरायः॥ वेदनिधिश्च यः प्रोक्तो वेदशास्त्रविशारद आसीत्दुर्व्यसनं तस्य न राम॰
त्तकाक्रीडनकादिकं॥ पेयं खाद्यं च तत्रैव करोति स निरंतरं॥ पित्रा ज्ञातं निपा॥ वो २२५
पि न निवृत्तस्तदा तु सः॥ मात्रा चापि तथा चात्रा भर्त्सितः स पुनः पुनः॥ न त्यक्तं व्यसनं ते

न पापिष्ठेन॥ दुरात्मना॥ कदाचिद्दीक्षितायैव रत्नं राज्ञा स्वयं कृतं॥ अंगुल्याभरणं श्रेष्ठं प्रसंवेष्टनेन तद्वस
या॥ द्विजेन तच गृहे गत्वा स्त्रियै रत्नं सुगोपितं॥ स्त्रिया मुक्तं गृहे चैव तेन दृष्टं दुरात्मना॥ कृतं रात्रौ च तत्रै
व नर्त्तक्यै विनिवेदितं॥ कदाचिन्नर्त्तकी सा च राज्ञे नृत्यं ह्यदर्शयत्॥ तस्मिंश्च समये राज्ञा दृष्टं चाभू
षणं शुभं मम॥ राज्ञा तस्यै तदा पृष्टं कुतो लब्धं त्वया शुभं॥ तया प्रतारितः सोपि नर्त्तक्या मासतो पुनः॥ अत्या
ग्रहात्तया यच्चैव बलतोपि तदा तदा॥ कथितं च ताम्यध्यमात विप्रं समाकयत्॥ समाहूयाब्रवीत्तं वै
वलयं नीयतां पुनः॥ कार्यं च वर्त्तते किंचित्तु नश्च नीयतां त्वया॥ इत्युक्तोथ द्विजश्चैव गृहमागम्य तां
पुनः॥ उवाच रे प्रिये रत्नं मया तन्नीयतां पुनः॥ तथेति सा वचः श्रुत्वा गता मुक्तवती यतु पुनः॥ स वै
गवेषयामास न लब्धं तु यतस्तदा॥ स्वामिने कथयामस लब्धं तेन मयाप्यतो॥ श्रुत्वा दुःखं समापन्नो
राज्ञे स तन्निवेदितं॥ न लब्धं तु मया राजन् किं करोमि कृतो गतं॥ तत् श्रुत्वा च तदा राज्ञा सर्वं च वि

447/1968

शिवि.
२२६

निवेदितं ॥ दुःखितो ब्राह्मणः श्रुत्वा स्वगृहे गत्वा स्त्रियं तदा ॥ भर्त्सयामास पापिष्ठे कुपुत्रे किं कृतं त्वया ॥ उन्मा
र्गे नर्तितः पुत्रो गच्छ त्वं गृहादिति ॥ त्वया प्रयोजनं नैव अस्माकं कुलदूषण ॥ निःकासितश्च
पुत्रो वै ताभ्यां वेदनिधिस्तदा ॥ गतो बहिस्तथासौ पितृभ्यां चिह्नमावहन् ॥ क्षुधितस्तृषित
श्चैव नर्तकः पितिरस्कृतः ॥ रात्रिर्जाता तदा तत्र क्षुधितस्तृषितस्तदा ॥ तद्दिने शिवरात्रि
श्च लोकानां पावनी शुभा ॥ कश्चिद्राजा बहुविधां पूजामादाय सत्वगंधनैवेद्यविविधैर्गच्छन्ग
तवान् शिवमंदिरे ॥ दृष्ट्वा तं च तदा रूढो भक्षयिष्याम्यहं पुनः ॥ इत्थं विचार्य दुष्टोपि जगामा
नुपदं तदा ॥ शिवस्य मंदिरं गत्वा पूजालोकजनैः सह ॥ ददर्श क्षुधया विष्टः अन्नभक्ष्यपरा राम.
यणः ॥ एकेनैव गमिष्यंति करान्नं भक्षयाम्यहं ॥ यथा तथा मया चान्नं गृहीतव्यं यथाधुना २२६
॥ इति बुध्वा तदा तेन जाग्रतं न परार्थतः ॥ लोकास्ति च तदा तत्र पूजां याम समुद्भवां ॥ कृत्वा

गीतं च नृत्यं च यामे चैव सुनिद्रिताः ॥ केचित् गृहं गतास्तत्र सुप्ताः केचन मंदिरे ॥ निद्रितांश्च तदा
दृष्ट्वा विप्रो वेदनिधिस्तदा ॥ अन्नं निवेदितं तत्र पक्वान्नं विविधं तदा ॥ तत् जिघृक्षुस्तदा तत्र स
मीपं तु शिवस्य च ॥ शनैः शनैः समागच्छन् विच्छाया दीपकास्तदा ॥ स सगन्नं न दृश्येत दीपच्छाया
शिवोपरि ॥ तेनैव वस्त्रखंडेहि शिरो वेष्टनजे तदा ॥ दीपश्चिरो ज्वलितस्तत्र अन्नार्थेन परार्थतः ॥ अं
धकारं शिवे दूरीभूतस्तदा शुभाः ॥ संदीप्य दीपकं तत्र अन्नं दृष्टं सुसुंदरं ॥ सर्वत्रैव गृहीत्वा 449/1968
च शनैः शनै रूपाच्चरे ॥ शयानेषु यदा स्पृष्टो विकलाः स्फुच्छितास्तदा ॥ कोयं कोयं ब्रुवंतश्च
चौरोयमिति चापरे ॥ तेषां तद्वचनं श्रुत्वा नीतो विप्रः प्रधावितः ॥ तेपि पश्चात् गतास्तत्र राज्ञ
श्च सेवकास्तदा ॥ पलायमानेनं तं दृष्ट्वा बाणास्ते प्राक्षिपंस्तदा ॥ बाणास्ते चेगृहस्ते लग्नस्तस्मा
त्सोपि पपात ह ॥ पतितश्च मृताः सोपि श्रूयतां मुषिसत्तमाः ॥ अज्ञानाच्च व्रतं जातं रात्रौ जागा

रणौ तदा॥ कृपालुत्वाच्छिवस्यैव सर्वं जातं सुशोभनं॥ एतस्मिन्नेव समये प्राप्तास्ते वै वस्वतस्य ह॥ किं
करस्य गणास्तत्र आजग्मुर्बलवत्तराः॥ उभयेषां तदा वादः समजायत वै तदा॥ गणाः शिवस्य ये
तत्र वनं चेदमब्रुवन्॥ कथं समागता यूयं रे दुर्नायरता यदि॥ ते चोचुर्गणा वयं तत्रा यूयं किं च समा
गताः॥ ॥यमगणा ऊचुः॥ ॥जन्मप्रभृति पापं च न पुण्यं चाणुमात्रकं॥ ॥शिवगणा ऊचुः॥ ॥
पापं बहुतरं चासीत्तस्य सारं न वत्क्षणात्॥ शिवस्य च व्रतेनैव दीपच्छायानिवारणात्॥ अ
द्यापि पातकं तिष्ठेत्गतं सर्वं दुरासदं रत्ते वैवि वैरं तस्य धर्मराजगतास्तदा॥ धर्मेणोक्तं च
सत्यं वै पापं च नष्टं तागतं॥ नमस्कारं तदा कृत्वा कलिंगाधिपतिं तदा॥ यातनां नच कारा
सौ प्रणाम्य नाग्यवान्तदा॥ कलिंगाधिगाधिपतिं तदा॥ यातनां न च कारात्वा शिवपूजापरा
यणः दीपपूजापरो नित्यं शिवरात्रिव्रतेरतः॥ स्वराज्ये शिवपूजां च दीपांश्चैव तदालये॥ कृ

रयित्वा तदा मुक्तिं लेभे च ऋषिसत्तमाः॥ एतद्रूपं तु व्रतमाहात्म्यमनायासतया कृतं॥ ये पुनः पर
या भक्त्या कुर्वंति व्रतमुत्तमं लभंते च परां मुक्तिं किं तत्र विस्मयः पुनः॥ चोरार्थिनः सुबुद्ध्या हि
दीपं तु कृतवान्हि सः॥ ज्ञात्वा दीपं च ये कुर्युस्ते लभंते शुभं पदं॥ एतस्मात्कारणात्श्रेष्ठा व्रतं
त्वेतादृशं न हि॥ शिवात्परो न दयालुः पावनो न परः स्मृतः॥ एतद्वृश्च समाख्यातं यत्पृष्टोऽहं
मुनीश्वराः॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात्॥ अतः परं न नास्त्येव मुक्तिः स्याद
नपायिनी॥ शिव एव परो देवः शिव एव परं पदं॥ शिव एव क्तिमुपरान्नातः परतरं व्रतं॥ ॥इति
श्रीशिवपुराणे शिवरात्रिव्रतनिरूपणं नमश्रीव्याधसंवादे नाम त्रिसप्ततितमोऽध्यायः॥ ॥७३॥ ॥
ऋषय ऊचुः॥ ॥मुक्तिर्नाम त्वया प्रोक्ता तस्याः किं तु भवेदिह॥ अवस्था कीदृशी सूत भवेदिति
॥वद त्वं नः॥१॥ ॥सूत उवाच॥ ॥मुक्तिश्च चतुर्विधा प्रोक्ता श्रूयतां कथयामि वः॥ सारूप्यं चे

451/1968

शिवि· २२९

वसालोक्यासौनिध्यातेचयथापुनः॥सायुज्याचऋषिश्रेष्ठव्रतेनानेनयानवै॥तत्किंलक्षणंहि
तस्यैवश्रूयतामृषिसत्तमाः॥यतःसर्वंसमुत्पन्नंयेनैवपाल्यतेहितत्॥यस्मिंश्चजीयतेसर्वं
येनसर्वमिदंततं॥तदेवशिवरूपंहिपठ्यतेचमुनीश्वराः॥विष्णुनातच्चनज्ञातंनज्ञातंब्र
ह्मणानच॥तथैवचकुमारैश्चनारदेनैवनश्रुतं॥शुकेनव्यासशिष्येणव्यासेनैवपुनः
॥तत्सर्वैश्चतदादेवैर्नज्ञातंनेतिनेतिच॥सत्यंज्ञानमनंतंचविदानंदउदाहृतः॥निर्गु
णोनिरुपाधिश्चनिरंजनोव्ययस्तथा॥नरक्तोनचपीतश्चनश्वेतोनीलएवच॥यतोवाचोनि
वर्त्तंतेमनसासहएव॥तदेवपरमंप्रोक्तंब्रह्मैवसंज्ञितं॥आकाशंव्यापकंचैवतथाचव्या राम·
पकमिदं॥नस्थूलंनचसूक्ष्मंचद्वंद्वातीतंविमत्सरं॥विकाररहितंतच्चदृष्टास्तीतिपर २२९
च॥तत्प्राप्तिश्चभवेदत्रशिवस्यभजनादिह॥तस्माच्छिवंचभजेतमुक्त्यर्थमृषिसत्तमः॥३

तिपृष्टंभवद्भिश्चतदेवकथितंमया॥यत्श्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥॥इतिश्रीशिव
पुराणेमुक्तिनिरूपणंनामचतुःसप्ततितमोऽध्यायः॥॥७४॥॥ऋषयऊचुः॥॥शिवःकोवाहरिः
कोवारुद्रःकोवासमारुतः॥ब्रह्माकोवाभवेत्तेषांवैकर्त्ताचजगतःस्मृतः॥तेषुनिर्गुणःकोवासंश
यंछेत्तुमर्हसि॥निर्गुणःकोवागुणीचैवसर्वंचकथ्यतांत्वया॥॥सूतउवाच॥॥यतःसर्वंसमुत्प
न्नंनिर्गुणात्परमात्मनः॥तदेवशिवसंज्ञंहिवेदवेदांतिनोविदुः॥तस्माच्चप्रकृतिरुत्पन्नापुरुषेणस
कलेनमन्विता॥ताभ्यांतपःकृतंतत्रमूलछेचजलेषुधीः॥पंचक्रोशीतिविख्यातेहर्षाच्चप्रसृतेनदं
च॥व्याप्तंचसकलंचैतत्तत्रसुप्तोहरिःस्वयं॥नारायणेतिविख्यातोवदंतिमुनयस्तथा॥नाराय
णीतिविख्याताप्रकृतिस्तुपुरोगता॥तत्रानिकलेयोवैजातःसचपितामहः॥तेनैवतरसादृष्टः
सवैविष्णुःसनातनः॥वैकुंठवासीयःप्रोक्तःमहालयेविलीयते॥उभयोर्वरदानार्थंयद्रूपंद

453
1968

र्नंबुधाः॥महादेवेतिविख्यातंशिवाचार्यान्निर्गुणादितेह॥अन्येचयेसंतितेनप्रोक्तंह्यहंरुद्रोभविष्यामि
रूपोलतः॥रुद्रोनामसविख्यातोलोकानुग्रहकारतः॥अन्येचयेसमुत्पन्नायथानुक्रमतोलयं॥
यांतिनैवतथारुद्रोमिशिवरुद्रोविजीयते॥सर्वेरुद्रेमिलित्वातुनयांतिप्राकृतान्इमे॥रुद्रोरमान्मि
लित्वातुनयतिश्रुतिशासनं॥सर्वेरुद्रान्नजंत्येवरुद्राःकेचित्नवेन्नहि॥अनंतजंतियेनित्यंत
स्मिंस्तेलीनतांगतांगताः॥तेनैवमहतंप्राप्ताःकालेनमहतापुनः॥रुद्रतत्कास्तुयेकेचित्तत्क्ष
णंशिवतांगताः॥तेनैव॥अन्यापेक्षानवैतेषांश्रुतिरेषासनातनी॥अज्ञातंविविद्येनत्वि
ज्ञानेविधंनहि॥ब्रह्मादितृणपर्यंतंयत्किंचित्दृश्यतेत्विह॥तत्सर्वंशिवएवास्तिनान्यत्का
र्यविचारणा॥सृष्टेःपूर्वशिवःप्रोक्तःसृष्टेर्मध्येशिवस्तथा॥सृष्ट्यंतेतुशिवःप्रोक्तस्तेनप्रो
क्तःसदाशिवः॥तस्मात्त्वनिर्गुणःप्रोक्तःशिवारावरूपीश्वराः॥येनैवविघ्नविदत्वास्वासनक्रिद

संज्ञिताः॥वाणीमंत्राद्यनेकैश्चध्यानेनचयजंतेबुधाः॥ईशानःसर्वविद्यानांश्रुतिरेषासनातनी॥सए
वशंकरःसाक्षात्सर्वानुग्रहकारकः॥कर्त्तापालयितासाक्षीसंहर्त्तासउदाहृतः॥अन्येषांकालम
नंचकालस्यकलनातथा॥तस्यमानंचकालस्यकलनानहि॥महाकालस्वयंसाक्षात्महाका
लीसमाश्रिता॥यथाचब्रह्मणोरुद्रोस्तथाकालीप्रवर्तते॥सर्वेतास्यांतथाप्राप्तमिच्छयोस्त
स्मिंल्लीनत[?]॥नोत्पादकश्चकश्चिद्देनहर्त्ताकश्चनप्रियः॥स्वयंचकारणंतेवैकार्यभूतास्सुतादयः
॥कार्येचकारणंकार्येस्वस्मिन्नेवकदाचन॥एकोप्यनेकतांयातअनेकोप्येकतांव्रजेत्॥एकं
बीजंवृक्षभूत्वापुनर्बीजंचजायते॥वस्तुत्वेचस्वयंसर्वेशिवरूपीमहेश्वरः॥जानातिज्ञान
वनान्नैवनान्यःकश्चित्रूपीश्वराः॥इत्येवंवचनंश्रुत्वापुनरूचुर्मुनीश्वराः॥ज्ञानंचलक्ष
णंब्रूहियत्ज्ञात्वाशिवतांव्रजेत्॥कथंशिवस्यसर्वेचशिवएवच॥एतत्सर्वंत्वयासूत

455
1968

शिवि.
२३०

कथनीयं हितायवै ॥ ॥सूतउवाच॥ ॥श्रूयतां ऋषयः श्रेष्ठाः कथयामि यथाश्रुतं ॥ ब्रह्मनारद
कुमाराणां व्यासस्य कपिलस्य च ॥ एतेषां च समाजे वै निश्चित्य समुदाहृतं ॥ इत्युक्त्वा कथया
मास नमस्कृत्य गुरोरथ ॥ ॥सूत उवाच ॥ ॥ इति ज्ञानेन तद्विज्ञेयं सर्वं शिवमयं जगत् ॥ य
दिच्छा तस्य जायेत तदा च क्रियते त्विदं ॥ सर्वं स एव जानाति नैनं जानाति कश्चन ॥ रचित्वा
च स्वयं तत्र प्रविष्टः पदूरतः स्थितः ॥ यथा च ज्योतिषश्चैव जवाजातो प्रतिबिंबता ॥ वस्तुतो
न प्रवेशो वै तथैव च शिवः स्वयम् ॥ वस्तुतस्तु स्वयं सर्वक्रमो हि भासते शुभाः ॥ अज्ञा
नं च मतेर्भेदो नास्त्यन्यस्य द्वयं पुनः ॥ दर्शनेषु च सर्वेषु मतिभेदः प्रदर्श्यते ॥ परं वेदांति
नो नित्यमद्वैतं प्रतिपादितं ॥ स्वस्यांशा जीवा वै अविद्या मोहिता वशाः ॥ अहमन्य
च जानाति तया मुक्तो भवेच्छिवः ॥ सर्वव्यापी शिवः साक्षाद्व्यापकः सर्वजंतुषु ॥ चेतना

राम.
२३०

चेतने सोपि सर्वत्र शंकरः स्वयं ॥ उपायं यः करोत्यस्य दर्शनं स लभेद् ध्रुवं ॥ यथाग्निर्व्यापकश्चै
को वह्निः काष्ठे च तिष्ठति ॥ यो वै मथति तत्काष्ठं स वै पश्यत्यसंशयं ॥ भक्त्यादिसाधनानीह क
रोति ऋषिसत्तमाः ॥ स वै मथ्या पश्यत्स [illegible] वै नात्र कार्या विचारणा ॥ शिवः शिवश्चैव नान्य
दस्तीति किंचित् ॥ नाना भाति स्वरूपो हि भासते शंकरः सदा ॥ यथा समुद्रो मृच्चैव सुवर्णमथ
वा पुनः ॥ उपाधितो हि नानात्वं लभते च तथैव च कार्यकारणयोर्भेदो वस्तुतो न प्रवर्त्तते ॥ यथा बी
जात्प्ररोहश्च नानाविधप्रकाशयेत् ॥ अज्ञश्च बीजमेव स्यान्नात्र कार्या विचारणा ॥ ज्ञानी बीज
मेव स्यान्नात्र कार्या विचारणा ॥ सर्वं शिवः शिवः सर्वं नास्ति भेदश्च कश्चन ॥ कथं च विविधं यत्रैप
देकत्वं न कथं पुनः ॥ यथैकं चैव सूर्यबिंबं जातिर्नानाविधं पुमान् ॥ जलादौ च विदृश्यन्ते(?) शेषेण
दृश्यते च तथैव सः ॥ सर्वत्र व्यापकश्चैव स्पर्शत्वेन विबुध्यते ॥ तथैव व्यापको देवो न च भाति

457/1968

शिवि. २३१

पुनःफचित्॥अहंकारतयाजीवस्तत्मुक्तःशंकरःस्वयं॥यथैकंचसुवर्णादिरजादितामिलितं
परं॥अल्पमूल्यंप्रजायेततथाजीवोप्यहंयुतः॥तदेवचसुवर्णंचक्षारादिशोधितंयदा॥पूर्ववन्मूल्य
तांयातितथाजीवस्यसंमतं॥यथाचसद्गुरुंप्राप्यभक्तिभावसमन्वितः॥शिवबुध्याकरोत्युच्चैःपू
जनंस्मरणंशुभं॥ध्यानंस्तवंचबुध्यापापादिदूरतोगतं॥तदज्ञानंचनश्येतशरीरंचास्थिरंबु
धः॥मत्वाचशिवरूपंचनित्यमेवसनातनं॥अज्ञानान्तदूरतोरेमत्वाज्ञानवान्जायतेतदा॥तदा
हंकारनिर्मुक्तोयातिशंकरतांतुसः॥यथादर्शस्वरूपंचस्वीयंचैवप्रदृश्यते॥तथासर्वत्रगं
शंभुंपश्यतीतिसुनिश्चितं॥जीवन्मुक्तायसौवादेहशौर्येभिविलयेत्॥श्रुतंलध्वानरूपंतल राम.
धाश्रुतंनकुप्यति॥द्वंद्वदुःखेसमश्चन्यंज्ञानवानंजायतेतदा॥अथवाआत्मयोगेनतत्वानां २३१
चविवेकतः॥यथेच्छचारीसोपिस्यात्शरीरेमुक्तिमिच्छता॥तदाशिवेविलीयेतमुक्तोविरहमे

वच॥ज्ञानमलंतथाप्यातंमतस्यतत्किंशिवस्यच॥भक्तेश्चप्रेमसंप्रोक्तमेनसुश्रवणंतथा॥श्रवण
स्यसतांसंगःसंगस्यसद्गुरुर्बुधा॥संपन्नेचतथाज्ञानेमुक्तोभवतिसुनिश्चितं॥इतिचेतज्ञानवान्
नोवैशंभुमेवसदाभजन्॥अनन्ययाचभक्त्यावैशंभुंप्राप्नोत्यसंशयं॥भक्त्यंतरामतश्चैतत्वैपुन
बीजिनसंयुतः॥उत्पद्यतेचभक्त्यावैयुक्तःशंभुंभजेत्पुनः॥अंतेचमुक्तिमायातिनात्रकार्याविचा
रणा॥अतोधिकोनदेवोस्तियंप्राप्यनतिवर्त्तते॥इतिमेविविधंवाक्यमृषीणांचसमागमे॥नि
श्चित्यचपुनश्चैवंकुमारेनारदादिभिः॥व्यासायैकथितंतैस्तुतन्मयंव्यासेनपालितं॥प्रथमंवि
ष्णवेदत्तंशिवेनलिंगसंभवे॥विष्णुनाब्रह्मणेदत्तंब्रह्मणासनदिकेषु॥नारदायततस्तेश्च
कथितंनारदेनच॥व्यासायचकृपितैश्चशस्तेनमह्यंकृपालुना॥मयाचैवभवद्भ्यश्चनदिवेलो
कहेतवे॥ख्यापनीयंप्रयत्नेनशिवप्राप्तिकरंपरं॥इतिविश्वसमारभ्यातेयतःप्रष्टोहमृषीश्वराः

459
1968

॥एतत्छ्रुत्वा च ते सर्वे आनंदं परमं गताः॥ हर्षगद्गदया वाचा प्रोचुस्ते पुनः पुनः॥ अस्माकंचे
तसोभ्रांतिर्गतात्वत्कृपयातव॥ ततश्छ्रुत्वा पुनर्वाक्यमुवाच ऋषिसत्तमान्॥ व्यासशिष्यस्तदुक्तंच
कथयामासतान्प्रति॥ नास्तिकायनवक्तव्यं श्रद्धाहीनाय वा तथा॥ अतत्काव्यनवाच्यं हि नवा
श्रुश्रुषवे श्रुताः॥ अष्टादशपुराणानि इतिहासाननेकशः॥ विद्यार्थ्यश्चाप्यनेकांश्च विचार्य
च पुनः पुनः॥ सारमेतत्समुद्धृत्य व्यासेन परिभाषितं॥ अभक्तो भक्तिमायाति भक्तस्य भ
क्तिवर्द्धनं॥ एकवारं तथा श्रुत्वा पापिनो भस्मतां ब्रजेत्॥ पुनः श्रुते च भक्तिश्च जायते पुरुष
स्य च॥ पुनः श्रुते विवर्द्धेत भक्तिश्चैव न संशयः॥ पुनः श्रुते शिवः साक्षात्स्वयं पश्यति तं मुनीश्व
रा॥ पुनः श्रुते भवंतो वै पश्यतीति सुनिश्चितं॥ तस्मात्पुनः पुनः श्राव्यं भुक्तिमुक्तिफलेप्सु
भिः॥ पंचावृत्तिः प्रकर्तव्या सस्य वचनेन विदः॥ समुद्दिश्य फलं श्रेष्ठास्तत्तत्प्राप्नोत्यसंशयं॥

न उर्जन्मं तु लंस्येव येनेदं श्रुतमुत्तमं॥ इत्युक्तास्ते ऋषिश्रेष्ठास्तस्तुः परया मुदा॥ पंचकृत्वस्तदाकृत्वा
लब्धं च शिवदर्शनं॥ पुरातनाश्च राजानः श्रुत्वा सिद्धिं परां गताः॥ इदानीं श्रोष्यते यो वै स वै सिद्धिं प
रां ब्रजेत्॥ इतितस्य वचः श्रुत्वा आनंदं परमं गताः॥ तं चैव पूजयामासुर्नानावस्त्रैः सुशोभनैः
॥ चंदनैश्च विचित्रैश्च नानालंकरणैस्तथा॥ नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्वकम्॥ ए
च संतुष्टः शिवभक्तिपः॥ आत्रीनि विविधानि च वर्द्धयामासुरं जसा॥ संतुष्टाश्चैव ते सर्वे संतुष्टः
स्त एव च॥ परस्परं च संतुष्टाः शिवभक्तिपरायणाः॥ एवं देवं परमं लानं मतिच भजंति च॥ ए
वं च सूत एवाद त्र सर्वान्कामानवाप्य यात्॥ अंते भक्तिं परां प्राप्य मुक्तिं प्रावेष्यु यास्तु नः॥ ॥इ
ति श्रीशिवपुराणे व्यासप्रोक्ते सूतशौनकसंवादे ज्ञानप्रकरणनिरूपणं नाम पंचसप्तति
तमोऽध्यायः॥ ॥७५॥ ॥संवत्॥१७॥२६॥ वर्षे ज्येष्ठवदि कादशपामो मवासरे लिखितमिदं शि

461
1968

शिव०
२३३

राम०
२३३

463
1968

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ज्ञा·व·
२३३

1164
1968

२३३